धिनः॥ तदासृष्टाविहर्त्ताचैवभविष्यसी॥ सर्व्वेसत्वाइमाबोनासानवर्ज्यसमाचराः॥ मिथ्याधर्म्मगताश
त्रास्तद्धर्म्मगुणनिन्दकाः॥ विहीनबोधिचर्य्याश्चपापसद्धर्म्मसाधिनः॥ निरर्थकधर्म्मसंरक्ताभवि
ष्यन्तिकलौयदा॥ तदापृथग्जनाःसर्व्वेभागसार्थमदमानिकाः॥ सर्व्वेतेशवशेगत्वाहरिष्यन्तिसदा
दरात्॥ आकाशंलिंगमित्याहुः॥ पृथ्वीचितस्यपीठिका॥ आलयःसर्व्वभूतानांलयनाल्लिङ्गमुच्य
तेतिसर्व्वेतदालोकाः॥ ब्रह्मापङ्कःप्रमादतः॥ सर्व्वान्देवांप्रतिक्षिप्यचविकिविमोहिताः॥ एतांस्त
४२

गुण

र्म्मैः समालोक्य बोधयित्वा प्रयत्नतः ॥ सत्कर्म्मार्ग्गे प्रतिष्ठाप्य ब्रतं चैवं प्रचारय ॥ एवं कृत्वा महत्-
स्थानं पदं प्राप्य महेश्वरः ॥ त्रैलोकाधिपतिर्न्नाथो भविष्यसि कलौ युगे ॥ ॐ एवं तत्समादिष्टं नि-
सम्य स महेश्वरः ॥ तथेति प्रतिनन्दित्वा तत्रैव समुपाश्रयत् ॥ तथासौ सर्व्वविक्रान्तो लोकेश्वर-
जिनात्मजः ॥ ब्रह्माणं समुपासन्नं संपश्यन्नेवमब्रवीत् ॥ ब्रह्मंस्त्वं च प्रपञ्चालीनश्चतुर्वेदाङ्गसं-
स्कृतः ॥ सृष्टिकर्त्ता जगत्कर्त्ता स्वचतुर्भुजविहायिकः ॥ शास्त्रचर्य्यासमाचारः सात्विकधर्म्मनाय-
कः ॥ परमार्थयोगविच्छित्वा कृतार्थस्त्वं भविष्यसि ॥ यदा कलौ समुत्पन्ने तव चर्य्या विनश्यति ॥
त्वं धर्म्मसमाक्रान्तः सद्गतिः प्रविहास्यत ॥ तदापि त्वं प्रयत्नेन नानावृष्यन बोधयन् ॥ धर्म्ममा-

३९

र्ग्गे प्रतिष्ठाप्य प्रापयस्व सुनिर्वृतिं ॥ एवं ब्रह्मन् समालोक्य सर्व्वान् सत्वान् प्रबोधयन् ॥ बोधिमा-
र्ग्गे प्रतिष्ठाप्य पालयस्व जगद्धितं ॥ एवं कृत्वा महत्कृत्यं तव वाद्धिं समृद्धवत् ॥ सृष्टिः स्वमाधिः
मासाद्य सम्बुद्धापि भविष्यसि ॥ ॐ एवं तत्समादिष्टं समाकर्ण्य प्रबोधितः ॥ ब्रह्मा तथेति संश्रु-
त्वाप्यनन्दप्रसादितः ॥ तत्रासौ च महासत्वो लोकेश्वरजिनात्मजः ॥ नारायणं समालोक्य स-
मामन्त्र्यैवमादिशत् ॥ विष्णुस्त्वं कामधात्वीशः सर्व्वलोकाधिपः प्रभुः ॥ राजाधर्म्माधिपः शास्ता
सर्व्वसत्वहितार्थभृत् ॥ महाविष्णुर्महावीरः सर्व्वदैत्यप्रमर्द्दकः ॥ संसारसुखसंभर्त्ता मायाधर्म्म-
विचक्षणः ॥ कलौ क्रीणं कुलासत्वान् नानावृष्यन बोधयन् ॥ आगमयित्वापि यत्नेन सर्व्वान् धर्म्मनियो-

गुण

राय॥ एवं कृत्वा महासत्व मद्वक्ष्यं गुणान्वितः॥ ब्रह्मा विष्णुर्वा नाथ लक्ष्मीपतिर्महर्द्धिकः॥ सर्व्वा
न्सत्वान्सुखीकृत्य सर्व्वदुःखानि निर्हृयन्॥ संबोधिं विरक्ता लोकनिर्वृतिपदमाप्स्यसि॥ ॐ एवं
तं समादिष्टं निशम्य स प्रबोधितः॥ विष्णुस्तथेति विज्ञप्य प्राप्तानन्दप्रसादितः॥ ततश्च सो महा
सत्व लोकेश्वरो जिनात्मजः॥ सरस्वतीं समालोक्य समामन्त्र्यैवमादिशत्॥ सरस्वती महादेवी स
र्व्वविद्या गुणाकरी॥ महामायाधरी सर्व्वशास्त्रविज्ञा शुभाविनी॥ सद्धर्म्मगुणसंहर्त्री सम्बोधि
व्रतपालिनी॥ ऋद्धिसिद्धिप्रदात्री त्वं वागीश्वरी भविष्यसि॥ सर्व्वान्मूर्खांस्तथा बालानपि सत्वान्
प्रयत्नतः॥ बोधयित्वा शुभे धर्म्मे योजयन्त्यपि पालय॥ यपितगव दीगत्वा हऊयूर्हकि मानसा

४०

ः॥ ऋद्धिमान्महाविद्याहृदयूः श्रीगुणाश्रयाः॥ एवं सत्वहितं कृत्वा महत्पुण्यगुणान्विता॥ प्रान्तबो
धिं समासाद्य संप्राप्स्यसि जिनास्पदं॥ ॐ एवं तत्समादिष्टं निशम्य सा सरस्वती॥ तथेति प्रतिनन्दि
त्वा तत्रैकान्ते समाश्रयत्॥ ततश्च सो महासत्व लोकेश्वरो जिनात्मजः॥ दिवाकरं समालोक्य समा
मन्त्र्यैवमादिशत्॥ सूर्य्य त्वं समहद्दीप्ति प्रभाकर ग्रहाधिपः॥ दिवाकरो जगल्लोकतमोन्तकारो भवि
ष्यसि॥ सर्व्वदास्य जगल्लोकं प्रकाशयन्विशोभयन्॥ बोधयित्वा शुभे धर्म्मे पालयस्व सदा जगन्
ततः सोऽव महासत्वो लोकनाथो जगत्प्रभुः॥ चन्द्रमसं समामन्त्र्यैवं समादिशत्॥ चन्द्रमस्त्वं महा
कान्तिः॥ शीतरश्मिः शशाङ्कः ताराधिपो जगत्क्लेशसन्तापहृद्भविष्यसि॥ सर्व्वदास्य जल्लोकं प्रव

गुण

षयन्सदामृतं ॥ ओषधीवृद्धिसस्यानांन सवीर्य्यप्रवर्द्धयन् ॥ प्रजाद सुखसंपन्नाकृत्वा मा गोप्
या धयन् ॥ सर्व्वान्सत्वाञ्छुहे धर्म्मं वाचयित्वा हि पालय ॥ ततो वायून्समालोक्य श्वनः समब्रवीत् ॥ स
र्व्वांस्तां समुपामन्त्र्य पूर्व एवमुपादिशत् ॥ यूयं समीरणाः सर्व्वे जगत्प्राणाः सुखावहाः ॥ सर्व्वध
र्म्मसुखोत्साहप्रकर्त्तारो भविष्यथ ॥ प्रवहन्तः सदा यूयं पुण्यगन्धसुखवहाः ॥ प्रवर्त्तयित्वा ज
गद्धर्म्मं संपालयस्व ध्वमाहवं ॥ ततः पृथ्वीं महादेवीं समालोक्य स सर्व्ववित् ॥ जिनात्मजो लोकना
थः समामन्त्र्यैवमादिशत् ॥ पृथिवी त्वं जगद्धर्त्री सर्व्वलोकसमाश्रय ॥ वसुन्धरा जगद्धात्री विश्व
माता भविष्यसि ॥ सर्व्वधातुं सुवस्तूनि वृद्धिसस्यमहौषधीः ॥ दत्वा सत्त्वेभ्य सद्धर्म्मं पालयस्व ज

६१

गत्सदा ॥ ततो वरुणं समालोक्य स लोकेशो जिनात्मजः ॥ पूर्ववत्समुपामन्त्र्य व्याकवादवमादिशत् ॥
वरुण त्वमपां नाथः सर्व्वसत्त्वामृतप्रदः ॥ सर्व्वन्लोकनाधिश्च नागराजो भविष्यसि ॥ सदामृतप्र
दानेन तर्पयित्वा प्रबोधयन् ॥ दत्वा नत्वानि सद्धर्म्मं वाचय जगत्सदा ॥ ततो वह्निं समालोक्याव
मतान्प्रकाश्व यं ॥ सर्व्वलोकाधिपः अग्निं समामन्त्र्यैवमादिशत् ॥ वह्ने त्वं सर्व्वदेवानां मुखीभूतो
हुतांशभुक् ॥ पावकः सर्व्ववस्तूनां दहनः पावकोऽप्यसि ॥ तस्मात्त्वं सर्व्वप्रयत्नेन सर्व्वलोकान्प्रहर्षय
न् ॥ सदा लोकसुखं दत्वा संपालय जगद्धितं ॥ ततो लक्ष्मीं महादेवीं लोकनाथः स संमतिः ॥ पूर्व
तः समुपामन्त्र्य समालोक्यैवमादिशत् ॥ लक्ष्मी त्वं श्रीमहादेवी मादृश्वजीवनसुन्दरा ॥ सर्व्वसम्पत्ल

गुण

त्साहं प्रदापयनीह विष्यसि ॥ सधर्म्मगुणरत्नादिमहासम्पत्सुखान्यपि ॥ दत्वा धर्म्मे प्रतिष्ठाप्य पालयस्व जगत्सदा ॥ ततः श्रीघं समालोक्य स लोकेश्वरो जगत्प्रभुः ॥ पुनस्तं समुपामन्त्र्य व्याकरणमेवमादिशत् ॥ कुलपुत्र त्वं महाराजः सर्व्वद्वीपाधिपः प्रभुः ॥ श्रीसम्पत्सद्गुणाधामा राजा नाम्ना भविष्यसि ॥ दत्वा श्रीगुणसंपत्तिः प्रदत्वा संप्रबोधयन् ॥ बोधिमार्गे प्रतिष्ठाप्य पालयस्व सदा जगत् ॥ एवं स जगन्नाथो लोकेश्वरो जिनात्मजः ॥ सर्व्वांस्तान्सकलान्देवान्समामन्त्र्यैवमादिशत् ॥ यूयं सर्व्वे महासत्वाः सम्बोधिव्रतचारिणः ॥ सर्व्वसत्वहितं कृत्वा प्रवर्त्तध्वं सदा शुभे ॥ एवं कृत्वा महत्पुण्यं श्रीसमृद्धिसमन्विताः ॥ क्रमात्संबोधिमासाद्य सम्बुद्धपदमाप्स्यथ ॥ इत्येवं तान्समादिश्य कृत्वा स

६२

र्व्वे प्रबोधिताः ॥ ततो देवाः प्रतिनन्दन्तस्तथेति प्रतिशुश्रुवुः ॥ एवं ते सकला देवा धृत्वा तस्यानुशासनं ॥ बोधिचर्य्यां समाश्रय संप्रचेरुर्जगद्धिते ॥ तदनुशासनादेव सर्व्वलोकाधिपा अपि ॥ बोधिचर्य्याव्रतं धृत्वा संचेरिरे जगद्धिते ॥ एवं स त्रिजगन्नाथो लोकेश्वरो जिनात्मजः ॥ बोधिसत्वः महाभिज्ञः सर्व्वलोकाधिपेश्वरः ॥ यतस्त्रिजगत्सत्वास्तु शुद्धया गतनतङ्काः ॥ सर्व्वे ते विमलात्मानो नैव गच्छन्तीह दुर्ग्गतिं ॥ सदा सद्गतिसंजाताः सद्धर्म्मश्रीगुणान्विताः ॥ निःक्लेशा बोधिमासाद्य सम्बुद्धपदमाप्नुयुः ॥ सर्व्वेऽपि सुगतास्तस्य शुद्धया गतनीगताः ॥ ध्यात्वानुस्मृतिमाधाय प्रवर्त्तन्ते जगद्धिते ॥ एतस्यानुभावेन निःक्लेशा विमलाशयाः ॥ जिनात्मजा बोधिं प्राप्य गताः सुनिर्वृतिं ॥ सुगता अपि सं

गुण

वृद्धा वर्द्धमानाश्च नागराः॥ सर्व्वेपि तत्रागच्छन्तु श्रद्धयासंनिगताः॥ ध्यात्वा तत्समाधिमाधाय प्रव
न्नकाऽगच्छत॥ बोधिचर्य्याव्रतं धृत्वा सर्व्वसत्त्वं गच्छत॥ कुम्भत बोधिसम्भारपूरयित्वा यथावि
ध्वं॥ जित्वा मारगणां सर्व्वान् बोधिं प्राप्य हवञ्जिनाः॥ एवं कृत्वा हि विघ्नं कृत्वा धर्म्मनाथा मुनीश्वराः
॥ अर्हन्तः सुगतानाथाः सर्व्वज्ञास्त्रि विनायकाः॥ एवं स त्रिजगन्नाथो लोकेश्वरो महर्द्धिमान्॥ बो
धिसत्त्वो महासत्त्वः सर्व्वलोकाधिपेश्वरः॥ सर्व्वसत्त्वहितार्थेन बोधिचर्य्याव्रतं चरन्॥ सर्व्वान् स
त्त्वान् स्वयं पश्यन् करुणास्य समुद्धरन्॥ बोधिमार्गे प्रतिष्ठाप्य बोधयित्वा शुभं ददौ॥ बोधयन् सह
प्रसन्नात्मा प्रजयस्सुखावतीं॥ एवं सद्गुणाधारो लोकेश्वरो जिनात्मजः॥ बोधिसत्त्वो महास

४३

त्त्वः सर्व्वधर्म्महितार्थभृत्॥ नास्तितस्य समः कश्चित् सद्धर्म्मगुणपुण्यवान्॥ कृताञ्जलिकाः एवं ते न लोके
श्वराङ्गताः स्तुवन्तः॥ ॐ नमस्सुगते सर्व्वे सम्बुद्धेः सर्व्वदर्शिने॥ लोकेश्वरगुणमहात्म्यं समाधिस्थं श्रु
तं मया॥ श्रीदृग्भृत्वगुणमाहात्म्यं लोकनाथस्य विपश्यिना॥ मुनीन्द्रेण समाधिस्थं पुनामया हि संश्रुतं॥
तस्माल्लोकेश्वराः सर्व्वसंघाधिपाऽगच्छन्तु॥ सवन्तीय॥ प्रयत्नेन सद्धर्म्मगुणवाञ्छिभिः॥ यक्षस्मण
वसंश लोहकिं श्रद्धया सदा॥ दुर्गतिक्लिन्न गच्छन्ति सर्व्वतापिकया च न॥ सदा संगतिसंज्ञानाद्ध
र्म्मश्रीगुणकामिनः॥ श्रुत्वा सत्यहं प्रभु गेहे प्राप्स्यामि सुखावतीं॥ ॐ एवं हि समादिष्टं भगव
सिंहस्यतायिना॥ श्रुत्वा सर्व्वसभालोकाः प्राप्तानन्दं प्रबोधिता॥ ❀ ॥ इति श्रीगुणकारण्डव्यू

गुण

भमहायानश्रुतः मभ्भवनादिदवसमूसादप्रकनशीलनीयः॥ ३ ॥अथसर्वनीवरणविष्कम्भी
सूत्तासनात्॥ सोऽञ्जलिं भगवन्तं प्रणम्यैवमब्रवीत्॥ भगवन्सममहासत्वा लोकेश्वरनाऽगताभु
भूः॥ कदाहं समुपागच्छत्तूमिच्छामि तं प्रभुंः॥ इति तद्वक्यमाकर्ण्य भगवान्समुनीश्वरः॥ वि
ष्कम्भीनं महासत्वं तमालोक्यैवमादिशत्॥ विष्कम्भीन्सममहासत्वा नागच्छोदिदसाम्प्रतं॥ अत्रतत्र
नकसत्वानूद्धर्तुं महि गच्छति॥ सर्वत्रापि स्वयं गत्वा संपश्यन्नवकातिमान्॥ सर्वान्सत्वान्समुद्धृत्य
प्रबोधयति सुखावती॥ एवं सर्वदा सत्वान्स्वयं पश्यं दिनादिन॥ असंख्येयान्समुद्धृत्य प्रबोधयति सुः
खावती॥ एवं कृत्वा स लोकेशो बोधिचर्याव्रतं चरन्॥ असंख्येयपुण्यवन्तोयः श्रीसम्बुद्धाविनाजन॥

४४

तस्य पुण्यमसंख्येयमप्रमेयं च फलं॥ सर्वेनापि मुनीन्द्रेणाप्रमातुं ते न शक्यते॥ इत्येवं सुगते ः
सर्वेः प्राख्यातं मया श्रुतं॥ तदहं प्रवक्ष्यामी शृणुध्वं प्रमादतः॥ तद्यथाभूत्पूर्वमस्माज्जिनोरवी
नाम तथागतः॥ सर्वज्ञः सर्वमहाहिस्ला धर्मराजा मुनीश्वरः॥ सर्वविद्याधिराजेन्द्रः सम्बुद्धः सुगतो जि
जिनः॥ मारजित्सर्वलोकेन्द्रो धातुकविनायकः॥ तदासं बोधिसत्वोहं दानसत्वाहि धार्गृही॥ सद
दानव्रताधीनः सर्वसत्वहितार्थभृत्॥ सदा स लिखितनस्कस्य मुनीन्द्रस्यानुगाज्ञ्या॥ सतस्य शुभया
नित्यं प्रारब्धसमुपस्थितः॥ तदा तेन मुनीन्द्रेन समाख्यातं मया श्रुतं॥ लोकेश्वरस्य सद्धर्मसाधन
ह्वकौशलं॥ इति तन्मुनीन्द्रेन समाख्यातं निसम्यग॥ बोधिसत्वो महासत्वविष्कम्भी चैवमब्र

गुह

वीतः॥ भगवंकीन्द्राणां नमस्य लोकनाथस्य महात्मनः॥ सद्धर्म्मसाधनार्थं कोशलं भवताश्रुतं॥ भगव-
न्स्त्वमासाद्य सर्व्वान्संप्रबोधयन्॥ सर्व्वलोकाञ्छुभमङ्गला भवयुक्तप्रभावनाः॥ इति संप्रार्थि-
तं तेन श्रुत्वा सो भगवाञ्जिनः॥ सर्व्वलोकान्सभासीनां समालोक्यैवमादिशत्॥ यथा स भगवाञ्छास्ता
शिखी तथागतो जिनः॥ सर्व्वलोकसभामध्यसमांधिकः समाश्रितः॥ आदिमध्यान्तकल्याणं सम्बोधि-
गुणसाधनं॥ सद्धर्म्मसमुपायं च समावदज्जगद्धितं॥ तदा तस्य मुखद्वाराद्नानावर्ण्णाः सुरश्मयः॥
विनिर्ग्गता जगत्सर्व्वमवभास्य प्रविविशुः॥ कृत्वा सर्व्वत्र लोकेषु सुरडान्तिसमन्ततः॥ पुनरागत्य सा
कान्तिस्तदाशु समुपागता॥ शिखिनं च महाभिज्ञं धर्म्मनाथं मुनीश्वरं॥ त्रिधा प्रदक्षिणी कृत्वा

६०

मुखाब्जे समाविशत्॥ तत्र स्थं प्रभां दृष्ट्वा लोकाश्चैवं सविस्मिताः॥ अमिताभो जिनस्तत्र प्रबुद्धे-
वंसमादयान्॥ भगवत्कस्यास पूर्व्वं कालेऽस्मिन् समागता॥ तद्भवान्समुपादिश्य सम्बोधयतु नागुणा
ञ्ःहितः इकुसाक भगवानमितप्रभः॥ लोकाश्चैवं सभासत्वं तमालोक्यैवमादिशत्॥ कल्पपूर्व
शिखीनाम सम्बुद्धो र्हन्मुनीश्वरः॥ सर्व्वज्ञो जगच्छास्ता धर्म्मनाथस्तथागतः॥ विभानस्तत्र काश्यान
समागतः सभांधिकः॥ सर्व्वलोकसभामध्यसमासीनः प्रकाशयन्॥ सद्धर्म्मसमुपायं च भावयत्कनु
तंधुना॥ तस्यायं सुप्रभा कान्तिर्मुखद्वाराद्विनिर्ग्गता॥ सर्व्वजगद्भुवनं चैवं सर्व्वलोकप्रवर्त्तता॥ ञ्ः हापि
समुपायाता भासयन्ति प्रविविशताः॥ पत्राव्दृश्यं तस्य मुखप्राविशत्पुनः॥ ञ्ः रूपादि संस्मरीश्च

गुरु

श४

दालोक्य चैनं प्रसादितः ॥ सुमित्राहं महीन्द्रं कं प्रणत्वैवमभाषत ॥ भगवन्धर्म्मधातुकं द्रष्टुमिच्छा
मि साम्प्रतं ॥ तत्राहं गमिष्यामि तदाज्ञां दातुमर्हसि ॥ इति संप्रार्थितं तेन साक्षस्यत्त निसम्य
सः ॥ सुमितां तां महीन्द्र उत्सुकं लोकं तमेवमब्रवीत् ॥ कुलपुत्र महीन्द्र त्वं यदि द्रष्टुमिच्छसि ग
च्छ वचनं नापि कोऽलं प्रष्टुमर्हसि यत्नं समुपच्छाप्य तस्य पश्यंस्तवामपि ॥ समुपासोऽपि सद्धर्मं
श्रुत्वा गत्वानुमोदितः ॥ इत्यादिष्टं महीन्द्र सा उपश्रुत्वालोक्य चैनं मुदा ॥ साञ्जलिः संपुटं कृत्वा नत्वा सं
तोषयन्स्तदा वनं ॥ यदा तत्र सुखावह लोके समस्तु ह्रीतः ॥ तदा सर्पतः तदा सर्वाम् सहसाद्धि सागर
ब्रह्मा प्रष्टुं पिता ॥ प्रावर्षद्दिव्यगन्धान्कमलान्यं महोत्पलं ॥ निकृत्यात्तं शुभात्ता दृं प्रावर्षत समन्त
नि

६३

तः ॥ तदा तत्र समुद्यानकल्पवृक्षाः समुद्भिताः ॥ दिव्यवस्त्रसुवर्णादिरत्नालङ्कारलम्बिताः ॥ ना
नाकुसुमवृक्षाश्च सर्वत्र पुष्पशोभिताः ॥ अनेकफलवृक्षाश्च दिव्यरसफलान्विताः ॥ पुष्कराणि सुग
सम्पन्नजलपूर्णाः सरोवराः ॥ नानापक्ष्यादिसंकीर्णाः प्रादुर्भूता मनोरमाः ॥ विविधपुष्पवर्षाणि
द्रव्याणि विविधान्यपि ॥ रत्नादिधातुरत्नानि वस्त्राणि भूषणानि च ॥ सुवर्णरत्नसाम्बादं संपन्न
भोजनान्यपि ॥ धान्यादिवृष्टिजातानि प्रावर्षन्त तदा शुभ ॥ तत्र सफलतां निर्गतानि जितोऽश्वस्य
सर्व्वा भूमी च सौवर्णी रत्नासा सर्वतो तदा ॥ तदालोक्य च तत्र पद्मसहस्रपत्रं सुवर्णिकं ॥ सफलत्वं मया
कालं समादाय तत्र चैत्ये ॥ एवं कृत्वा महत्स्थानानि मिलित्वा संप्रकाशयन् ॥ सर्वलोकजगल्लोकं समा

गुण

लोक्य समन्वितः॥ प्राणिनो ऽपि रविनः सर्व्वान्समृद्धसुप्रयत्नतः॥ बोधिमार्गे प्रतिष्ठाप्य संप्रेषय सु
खावतिं॥ स्वयं च तस्मिं समुत्सृज्य सहायगणसमन्वितः॥ सम्बुद्धं तिरविनं द्रष्टुं गन्धिहान समुपाचर
न्॥ तान्यद्भुतनिमित्तानि विलोक्य न सहाष्ठितः॥ रत्नपाणिर्महासत्त्वबोधिसत्त्व हि लोकयन्॥
विस्मितः सहसोत्थाय पूर्वतः समुपाचरन्॥ उद्वहन्नुत्तरासंगं जानुं तं स्तुविसंस्थितः॥ भगवन्तं मु ४७
नीन्द्रं संबुद्धमिति रविनं मुदा॥ कृताञ्जलिपुटानत्वा प्रपच्छैवं समादरात्॥ भगवन्कस्य साहाकान्ति
र्यमिहसमागता॥ महद्भुतनिमित्तानि कस्यानुभावानि च॥ भगवन्तत्समादिश्य सर्व्वानि
मांसहागतान्॥ विस्मयाकुलचित्तांश्च प्रबोधयितुमर्हसि॥ इति संप्रार्थितं तेन ज्ञात्वा तिरवि

नथयात॥ रत्नपाणिं महासत्त्वं तं पश्यन्नेवमादिशत्॥ रत्नपाणे महासत्त्व शृणुष्व यदिहाधुना॥ म
हद्भुतनिमित्तानि संजातानि समन्ततः॥ तद्धेतुं संप्रवक्ष्यामि शृणुष्वमिदमादरात्॥ यूयं सर्व्वप्रमि
दकः प्रतिबुद्धानुमोदन॥ यः श्रीमान्भगवान्नाथो बोधिसत्त्वो जिनात्मजः॥ सर्व्वसत्वप्रियः शास्ता
सर्व्वलोकाधिपेश्वरः॥ सत्त्वोपपन्नं समुद्धर्तुं सुखावत्यां विनिश्चरन्॥ पूर्व्वस्मिंस्तत्र गच्छं संहास्य
समन्वितः॥ बोधयस्मिञ्जगल्लोकं कृपाहृद्समन्वितः॥ पापिनोपि हि गावाना सर्व्वत्र नरकेष्वपि
निमग्नांस्तान्समालोक्य समुद्धृत्य समन्ततः॥ बोधयित्वा प्रयत्नेन कृत्वा सद्धर्म्मलालसान्॥ बोधिमा
र्गे प्रतिष्ठाप्य संप्रेषय सुखावतीं॥ मम दर्शनं कर्तुं समागच्छति सांप्रतं॥ तस्यायं सुप्रभाकान्तिर्हीण

गुण

यक्षिसमागताः॥ दृष्ट्वाद्भुतनिमित्तानि संजातानि समन्ततः। तदद्भुतमयं तस्य लोका विस्मयमागतास्
रवत्। इत्यादिष्टं मुनीन्द्रेण रत्नपाणिर्निशम्य सः॥ संबुद्धं तं सहानन्दात् समालोक्यैवमब्रवीत्॥ भ
गवन्महासत्त्वालोक्यथा जगत्प्रभुः। नागाः कति कदागच्छन्निह भूमिक्षामितं प्रभुं॥ इति तन्नादि
तं श्रुत्वा भगवान् स शिखी जिनः। रत्नपाणिं समालोक्य सहासं चाप्येवमादिशत्॥ आगच्छन्ति समन्तात्त
त्तालाक्ष्यथाः सृष्टः स्थितः॥ सत्त्वाः सर्वे समुत्सुकाः प्रपश्यलोसखावती॥ प्रथममिह मां द्रष्टुमा
गच्छत्तत्कृपानिधिः॥ ततस्तं त्रिजगन्नाथं पश्यध्वं सुसमादरात्॥ इत्यादिष्टं मुनीन्द्रेण श्रुत्वाग रत्नतं
मुदा॥ सह सर्वसभालोकैस्तस्थौ तद्दर्शनोत्सुकः॥ तदासौ त्रिजगन्नाथालोक्य सर्वाः प्रबोधयन्॥ इः

४८

मानं स्वगणं पश्यं विहारं सम्प्राविशत्॥ तेऽलोक्य तं समायान्तं सभिक्षुसगणासनं॥ सर्वलोकाः सहासीनाः
समुत्थाय प्रणामिन॥ रत्नपाणिः समायान्तं पश्यन् सहसोत्थितः। साञ्जलिः समुपागम्य ववन्दे तस्य पदां
बुजं॥ एवं संवन्द्यमानस्तैः सर्वलोकैः प्रबोधयन्॥ शिखिनं तं समालोक्य पूर्वतः समुपाविशत्॥ तं
समायान्तमालोक्य भगवान् स शिखी मुदा॥ स्वागतं ते महासत्त्व कौशलमित्यपृच्छत। इत्यादिष्टं स
दिन्द्रेन श्रुत्वा सस्वगणोत्सुकः। कोशलं मम सदा शास्तस्त्वत्कृपातिवदन्नुपाविशत्॥ तत्रासौ त्रिजगन्नाथ
ः शिखिनं तं मुनीश्वरं॥ वन्दित्वा तं महाप्राज्ञमुपस्थायैवमब्रवीत्॥ भगवन्निमित्तानेन शास्त्रं प्र
हितंकरं॥ कुशलं चापि सर्वत्र प्रवर्त्ततां समन्ततः॥ इति तदुक्तमाकर्ण्य भगवान् स शिखी मुदा॥ गृही॰

गुण

लानं महाप्राज्ञं वामस्थं प्येवमब्रवीत्॥ सर्व्वज्ञो भगवन्नत्र कश्चिन्नास्त्यपि कोविदः॥ इति पृष्टो मु-
नीन्द्रः श्रुत्वैवं पर्षद्यथाक्रमं॥ कुलपुत्र त्वया सत्वाः कियन्तो नरकाश्रिताः॥ समुद्धृत्य शुभे स्थाप्य
प्रेषिताः सुखावतीं॥ इति पृष्टः स बोधिसत्वो लोकेश्वरो विलोक्य तां॥ संबुद्धं तं सभां चापि समा-
लोक्यैवमब्रवीत्॥ भगवन् बहवः संख्याय सत्वा नरकाश्रिताः॥ न सर्व्वेऽपि प्रयत्नेन मया लोक्य स-
मुद्धृताः॥ तथाप्यमी महादुःखाः स्वीयकर्म्मभागिनः॥ तेऽद्यैव कालसूत्रे च महारौरवतपनेऽपि च॥ नाद-
न्यसिपत्रवने शाल्मलिके च पापिनः॥ संघाते चान्धकारे च वैतरण्यामसिपत्रके॥ एवमन्येषु
नरकेषु समन्ततः॥ स्वकृतं कर्म्म भुञ्जाना तिष्ठन्ति दुःखभागिनः॥ तीव्रदुःखाग्निसन्तापाम्

४५

तो विरहफलवन्तः॥ न सर्व्वेऽपि मयाकृष्य संप्रेषिताः सुखावतीं॥ भूताः प्रेताः पिशाचाश्च क्षुत्पिपासा-
ग्निदाहिताः॥ शुचिमुखाद्या दुःखा विन्मूत्रामध्यभोगिनः॥ पशवोऽपि च ये दुःखाः पक्षिणोऽपि हता-
वनाः॥ कृमिकीटादयश्चापि स्वकर्म्मफलभागिनः॥ न पि सर्व्वे मया लोक्य भावयित्वा स्वकर्म्मतः॥
समुद्धृत्य प्रयत्नेन संप्रेषिताः सुखावतीं॥ एवमन्येऽपि सत्वाश्च मर्त्यादेशाः स्त्रियोऽपि॥ मूढ-
र्म्मोहिता दुष्टाः पापा नरकगामिनः॥ न पि सर्व्वे मया लोक्य बोधयित्वा प्रयत्नतः॥ सद्धर्म्मे संप्र-
तिष्ठाप्य संप्रेषिता जिनालये॥ एवं निःसंख्यं मया लोक्य प्राणिलोका दुःखितार्द्दिताः॥ सर्व्वेऽपि नरकासीना-
स्तीव्रदुःखाभितापिताः॥ दिने दिने प्रसंख्यया समुद्धृत्य प्रयत्नतः॥ बोधयित्वा शुभे स्थाप्य चावसिल

गुणसम्पन्नं॥ बोधिमार्गे नियुक्त्वैवं संप्रेषिता जिनालये॥ यथा मया प्रतिज्ञातं तथा कर्त्तव्यम्भवता नः॥ ०
गुण तितिश्चं समालोक्य स लोधर्म्मश्रियाजितः॥ यावन्तः प्राणिनः सर्व्वे यावन्न बोधिभागिनः॥ तावदहं न
सम्बोधिं संप्राप्नुयां जगद्धिते॥ ० इति प्रतिज्ञा मया वत्न परिपूरिता॥ तावत्वन्तस्त्वान्समालोक्य
समुद्धरत्नप्रयत्नतः॥ बोधयित्वापि कृत्वाव बहुब्रह्मविहारिणः॥ बोधिमार्गे प्रतिष्ठाप्य प्रेषयेयं ९०
सुखावती॥ ० एवं भगवच्छ्रुत्वा बोधिचर्य्यां समावहन्॥ सर्व्वसत्वहितं कृत्वा वत्रिधातुकपथि
एवं नित्यं जगल्लोकं कृत्वा नडसुखासवं॥ प्रावर्तं प्रवरामवं वनिष्यामि सदा भव॥ ० इत्युक्तास
महासत्वः लोकेश्वरो जिनात्मजः॥ तस्य सत्कं शिखीनं तत्वा समनुज्ञां मयाचत॥ भगवन्तं गत्वा भिक्षा

भिक्षत्वानुष्ठातुमिच्छतः॥ तदनुज्ञां प्रदत्वा मे प्रसीदतु जगच्छिते॥ ० इति तद्वाक्यमाकर्ण्य स शिखी भगवान्
मुदा॥ लोकेश्वरं महाभिज्ञं समालोक्यैवमब्रवीत्॥ सिद्ध्यतु ते महासत्व कार्य्यं सम्बोधिसाधनं॥ गच्छ
लोकहितं कुर्व्वन् संचरस्व यथासदा॥ ० इत्यादिष्टं सुधीः श्रुत्वा लोकेश्वरो जगत्प्रभुः॥ शिखिनं ध-
र्म्मराजं तं प्रदक्षिणावर्त्ततः॥ प्रणमित्वा ततः श्री शिरसि ० वसम्भूत्वात्र॥ आकाशेन हितान
त्रिभुवनं भासयन्ययौ॥ तं भवत्खगगतं दृष्ट्वा जलपाणि विस्मितः॥ शिखिनं भगवन्तं तं समालोक्यैव-
मब्रवीत्॥ भगवन् किं जगन्नाथ लोकेशस्य महात्मनः॥ कियत्तत्कृतं संभारं विपत्ते तत्समादिशत्॥ ०
इति संप्रार्थितं तेन श्रुत्वा स भगवान् शिखी॥ जलपाणिं समालोक्य समामन्त्र्यैवमादिशत्॥ कुलपुत्र शृणु
क

गुण

षासलोकेगण्यहृगस्तुताः॥पुण्यस्कंधंप्रवक्ष्यामिसत्वानांहितकारणं॥तद्यथैकमहासत्वाःसर्वे
षांमपिदेहिनां॥सर्वदासर्वसत्कारैरर्च्चितसम्पूजिताः॥तेषांपुण्यानियावन्तिमानिसर्वाणिस
मुद्राः॥लोकेशस्यैकवालाग्रेऽतिसर्वेजिनागगुः॥तद्यथापिचतुर्द्वीप्यमघावर्षन्तिसर्वदा॥त
त्सर्वजलबिन्दूनांसंख्यातुंशक्यतेमया॥नतुलोकेश्वरस्यास्यसत्पुण्यः॥पुण्यस्कन्धप्रमाणानिकर्त्तुं
केनापिशक्यते॥सर्वेषामपिवाद्धिनांसर्वेषामपिवाद्भुतां॥एकैकबिन्दुसंख्यानिकर्त्तुंशक्याम्यहं
ध्रुवं॥नतुलोकेश्वरस्यास्यसम्बोधिव्रतधारिणः॥पुण्यस्कन्धसंख्यानिकर्त्तुंशक्याम्यहंखलु॥
सर्वेषामपिवृक्षानांचतुर्द्वीपनिवासिनां॥एकैकपत्रसंख्याहिःप्रमातुंशक्यतेकिल॥नतुलोके

६९

श्वरस्यास्यसद्धर्मसमुद्भवंवृक्ष॥बोधिसत्वस्यपुण्यानांप्रमातुंशक्यतेमया॥इमनन्तमयाभ्रुयान्
परमाणू॥रजोपमान्॥विधायसर्वदारण्यप्रहृष्टसमूपस्थितः॥सम्यक्प्रतिमाचेवपरमाणू
रजोपमान्॥इमवलमयाकाप्यसर्वलोकामहासत्वेः॥सधातुवलपूर्णेर्हजयःसर्वदामुदाए
तत्पुण्यप्रमाणानिकर्त्तुंशक्याम्यहंध्रुवं॥नेवलोकेश्वरस्यास्यचतुर्ब्रह्मविहारिणः॥पुण्यसंख्याप्र
माणानिकर्त्तुंशक्नोमिसर्वथा॥सर्वेषामपिवृक्षाणांचतुर्द्वीपमहीरुहां॥पत्रसंख्याप्रमाणानिक
र्त्तुंशक्याम्यहंखलु॥नेवलोकेश्वरस्यास्यसत्वहितार्थदायिनः॥पुण्यसंख्याप्रमाणानिकर्त्तुंशक्नो
मिसर्वदा॥सर्वस्त्रीपुरुषाणांचचतुर्द्वीपनिवासिनः॥रोमापङ्क्तिकलकूप्यवानयपूःसस्तंव

गुरु

यं॥ तेषां पूर्व्वप्रमाणमसौ कर्त्तुं शक्नोम्यहं खलु॥ ननु लोकेन पूर्व्वाणां प्रमातुं न शक्याम्यहं॥ एतां
सर्व्वान्तथापि बोधयित्वा प्रयत्नतः॥ सकृदागमिनः कृत्वा वाचयत् पूर्वः गुरुः सदा॥ एतेषामपि
पूर्व्वाणां प्रमातुं शक्यते खलु॥ नैव लोकेन पूर्व्वाणां प्रमातुं शक्यते क्वचित्॥ तथैव समानन्वा सर्व्वा
बोधयित्वा समादयत्॥ सूत्रागमेषु तं संस्थाप्य वाचयत् पूर्वः सुसंवरः॥ एतेषामपि पूर्व्वाणां प्रमातुं
शक्यते क्वचित्॥ नैव लोकेनैवस्यास्य प्रमातुं शक्यते क्वचित्॥ तथैषां सकलान्सर्व्वान्बोधयित्वा प्रय
त्नतः॥ सूत्रं तत्त्वं संप्रतिष्ठाप्य वाचयत् पूर्वः सुनिर्वृतो॥ एतेषामपि पूर्व्वाणां प्रमातुं शक्यते न मयाः॥
ननु लोकेनैवस्यास्य शक्यते सर्व्वतोऽपि॥ तथा प्रत्येकं वा बोधयेत्सर्व्वानन्यकान्तानपि॥ बोधयि

१२

ति पूर्व्वे वाचयत् पूर्वः सुनिर्वृतो॥ एतेषामपि पूर्व्वाणां प्रमातुं शक्यते न मया॥ ननु लोकेनैवस्यास्य
सर्व्वेनापि महीत्वे ः॥ एतेषामपि सर्व्वेषां पूर्व्वाणां प्रवर्त्तनं महत्॥ पूर्व्वे लोकेनैवस्यास्य बहु प्रम
यमन्त्रम्॥ किं मये केन तत्पूर्व्वं प्रमातुमिह शक्यते॥ सर्व्वैरपि मुनीन्द्रैर्हि शक्यते न कदाचन॥
एवमसौ महत्पूर्व्वं सत्तानेकृतिसमृद्धिमान्॥ लोकेनैव यो महासत्त्व बोधिसत्त्वजिनात्मकः॥ ना
स्तिदं कृत्स्नं संतानं स [illegible] समृद्धिमान्॥ तदन्यादि महासत्त्वः कृत्स्नं धातुकेष्वपि॥ [illegible] तत्
महत्पूर्व्वं ज्ञात्वा पूर्व्वं प्रमादिताः॥ नमीश्वरमंगत्वा हि सर्व्वदा एव॥ यत्तस्य त्रिजगद्गुरोर्लोकेन
स्यजगत्प्रहाः॥ ध्यानानां समूहार्थस्तत्वास्तत्वफलं किं सर्व्वदा॥ एतच्छ्रुत्वा निर्मुक्ताः पंनि शुद्ध·

गुण

तिन्मुक्ताः। धर्मश्रीगुणसम्पन्नाः संप्रयायुः सुखावतीं॥ तत्रामिताभनाथस्य गत्वा ते भजन्तीमुदा॥ स
द्धर्मामृतमास्वाद्य तमप्यपूर्वं बोधिसाधिनः॥ तत्पश्च भवगं ज्ञात्वा बोधिचर्यां कयावन॥ गर्भवासमहद्दुःखं
लब्ध्वा पूर्णपूतभव॥ तस्मा भवसुखावस्थां पद्म तत्र मयर्व श॥ संज्ञाताः सततं ध्यात्वा तिष्ठयुः सन्मलि
वरं॥ तावत्तत्र सुखावस्थां तिष्ठयुः सुखान्विताः॥ यावत्तास्य गण्डसूत्र प्रतिष्ठापति पूजिताः॥ कल्प
नबोधिसत्त्वानं पूजयित्वा जगद्धिताः॥ त्रिविधां बोधिसामान्यं संप्राप्य पदमाप्नुयुः॥ एवं तं गुणातेः सर्वे स
मादिसंस्मयात्रयो॥ तदस्य लोकनाथस्य जन्तुबोधिवाञ्छितः॥ इत्यादिष्टं मृतिसुत वज्रपाणिर्नि
गम्यताः॥ शिखी तं भगवन्तं तं समालोक्यैवमब्रवीत्॥ भगवन्नस्य प्रतिष्ठायास्तृष्णा तिमद्रष्टुं ऐक्षि॥ किं
पू३

६३

त१ थं३

यतारवल्लोकालेन संपूर्तिता भविष्यति॥ कथमप्यकालेनात न सर्वे ते धातुकाश्रितः॥ बोधिमार्गे प्रतिष्ठा
प्य संप्रेषिताः सुखावतीं॥ कथमसौ महासत्त्वः सत्त्वान्नानाविमुक्तिकान्॥ एकप्रबोधयत्सर्वान्बो
धिमार्गे नियोजयत्॥ सत्त्वाः खजातिसंज्ञाता नानाकर्मानुवासिताः॥ एतान्सर्वानकं ह्येकः प्रबोधयन्
नियोजयत्॥ इति तेनादितं श्रुत्वा भगवान्स शिखी जिनः॥ वज्रपाणिं महासत्त्वं समालोक्यैवमब्रवी
त्॥ एकोऽप्यसौ महासत्त्वो महाभिज्ञो जिनात्मजः॥ नानारूप्यधरः सत्त्वानां सद्धर्ममुपादिशत्॥ बोधयन्त्रा
सिताः सर्वान्बाहुल्यं यथाप्सितं॥ बोधिमार्गे प्रतिष्ठाप्य प्रेषयति जिनालयं॥ केषाञ्चिद्बुद्धरूप्यधरः
बुद्धधर्मं नियोजयत्॥ बोधिमार्गे प्रतिष्ठाप्य प्रेषयति सुखावतीं॥ प्रत्येकबुद्धरूप्यश्च प्रत्येकबो

षिवाञ्छितं नः॥ बोधिमार्गे प्रतिष्ठाप्य प्रेरयति सुखावतीं॥ अर्हद्धर्म्मेनु संबोधकानर्हद्रूप्येन बोधयन्
अर्हद्धर्म्मं प्रतिष्ठाप्य प्रेरयति सुनिर्वृतिं॥ बोधिचर्य्याथिनो बोधिसत्वरूप्येन बोधयन्॥ बोधिच
र्य्याव्रते स्थाप्य चारयति जगद्धिते॥ तथा श्रावकरूप्येन प्रबोधयन्ननूपासकान्॥ बोधिमार्गे प्रति
ष्ठाप्य चारयति संवरं॥ तथा च शिवरूप्येन शैवान्सर्व्वान्प्रबोधयन्॥ बोधिमार्गे नियुञ्जासौ चारय
ति जगद्धिते॥ एवं सवैष्णवां विष्णुरूप्येन बोधयन्॥ बोधिमार्गे नियुञ्ज्या चारयति जगद्धिते॥ तथ
च ब्राह्मणांसर्व्वां ब्रह्मरूप्येन बोधयन्॥ बोधिमार्गे प्रतिष्ठाप्य चारयति जगद्धिते॥ तथेन्द्रानिन्द्ररू
प्येन सर्व्वानपि बोधयन्॥ बोधिमार्गे प्रतिष्ठाप्य चारयति जगद्धिते॥ तथा सूर्य्यस्य वेनेयां सूर्य्यरू

प्येन बोधयन्॥ बोधिमार्गे प्रतिष्ठाप्य चारयति जगद्धिते॥ तथा च चन्द्रवेनेयां चन्द्ररूप्येन बोधयन्॥
बोधिमार्गे प्रतिष्ठाप्य चारयति जगद्धिते॥ तथा च वह्निवेनेयां वह्निरूप्येन बोधयन्॥ बोधिमार्गे प्र
तिष्ठाप्य चारयति जगद्धिते॥ तथा च यमवेनेयान्यमरूप्येन बोधयन्॥ एवं वरुणरूप्येन वेनेयां वरु
णस्य च॥ तथा च वायुवेनेयां वायुरूप्येन बोधयन्॥ वेनेयां राक्षसस्यापि रक्षोरूप्येन बोधयन्॥ यक्षरू
प्येन यक्षस्य वेनेयां संप्रबोधयन्॥ नागरूप्येन नागस्य वेनेयां संप्रबोधयन्॥ तथा भूतसरूप्येन वेने
यां भूतपतेरपि॥ तथा गणेशरूप्येन वेनेयां गणपतेस्तथ॥ तथा कुमारवेनेयां स्कन्धरूप्येन बोधयन्
॥ तथा गन्धर्व्वरूप्येन गन्धर्व्वधर्म्मां बोधयेन्नः॥ तथा किन्नररूप्येन वेनेयां किन्नरस्य च॥ विद्याधररूप्येन

गुण

विधाधमान्नुवाधयन्॥ तथा हेमवतवेन्नयांरूपेण हेमवत्स्यव॥ महाकालस्यरूपेण वेन्नयांस्तस्य वाधयन्
मार्हकालान्नेरूपेण वेन्नयांसंप्रवाधयन्॥ वाधिमार्गे प्रतिरूपाप्य वाचयति जगच्छिन॥ एवं यक्षस्य रूपे वे
न्नयांसत्त्वांपत्नवाधयन्॥ तस्य तस्यैव वेन्नयां न्यमि वेन्नयां यति रूपेण यत्नरूपतिजगच्छिन॥ एवन्नृसृ
षिवेन्नयांमृषिरूपेण वाधयन्॥ योगिरूपेण वेन्नयां योगिनश्चापि वाधयन्॥ तथा व्रतयति वेन्नयां
यतिरूपेणवाधयन्॥ तथा तपस्वि वेन्नयांस्तपस्विरूपेण वाधयन्॥ तथा तीर्थिकरूपेण तीर्थिक
श्चापि वाधयन्॥ तथा वनाज वेन्नयां नाजरूपेण वाधयन्॥ वेश्यरूपेण वेन्नयां वेश्यास्यापि प्रवाधय
न् शूद्ररूपेण शूद्रस्य वेन्नयांश्च प्रवाधयन्॥ गृहपतेश्चापि वेन्नयांस्तु रूपेण प्रवाधयन्॥ तथा

गं ३

वणिजो वेन्नयांस क्रिरूपेन वाधयन्॥ तथा चाण्डालरूपेण ति वेन्नयां प्रवाधयन्॥ तथा व याध वेन्नयां
याधरूपेण काश्वन४॥ एवं कुक्कुरस्य रूपेण दाशरूपेण काश्वेन ४॥ काश्चित्सार्थरूपेण शिल्पिरूपे
ण काश्वेन॥ तथा यवयवरूपेण वनिग्रूपेण काश्वेन॥ काश्चिश्चपिरूपेण माहरूपेण काश्वेन॥ तथा
वराहरूपेण हार्यरूपेण काश्वेन॥ रूपेण पिरगिन्याश्च पूतरूपेण काश्वेन॥ काश्चिद्दुहितृरूपे
ण पोतरूपेण काश्वेन॥ एवंपीतामहादीनांज्ञातिनांस्तु सदामपि॥ वन्धुमित्रासहायानां रूपेणापवि
वाधयन्॥ काश्चिद्ब्राह्मणरूपेण सत्वांगायत्र्यपतन॥ काश्चिद्वालरूपेण वीनरूपेण काश्वेनः॥
सद्धर्मप्रवयेल्लेववाचयति जगच्छिन॥ एवं सिंहादि जन्तूनां रूपेण जागयंतपि॥ पशूनांपक्षिणम्

गुण

वापि किमिकीटादिप्राणिनां ॥ सूप्तनज्ञागयत्वापि वोधयत्वापि वर्त्तयत्यलम् । ॥ वोधिमार्गे प्रतिष्ठाप्य ः
वानयति जगद्धितं ॥ एवमसौ महासत्त्वो लोकनाथो जगत्प्रभुः । ॥ नानारूप्यधरः सर्व्वेषां सत्त्वानां वोधयं॰
मन । ॥ मार्गयन्नपि सद्धर्म्मं प्रवर्त्तयति प्रयत्नतः । ॥ एवं स त्रिजगन्नाथो वोधिसत्त्वो जिनात्मजः । ॥ सर्व्वान्स
त्त्वांस्समुद्धृत्य प्रभयती सखावतीं ॥ एवं करुणासलोक्य न सर्व्व लोकाधिपेश्वरः । ॥ दुर्द्धौ जन्मति सर्व्वदा
निहं दुष्टानामपि मर्दीना ॥ सद्धर्म्मसद्गुणश्रीमत्ताहेश्वर्य्यसमृद्धिमान् ॥ नास्ति कं न समः कश्चित्सून
श्रीगुणवानपि ॥ दयावूर्हेडसंयाति त्रैधातुभुवनेष्वपि ॥ एवं मस्य महत्पुण्यं मत्वा संवोधिवाञ्छि
तः । ॥ शुद्धयासनतो गात्वा सत्त्वा ध्मात्वा हजत्तुतः । ॥ यतस्य भवतं गात्वा सत्त्वा ध्मात्वा हजत्किंत ॥ सर्व्वदि

[illegible]

नि२

विमलात्मानाहज्ञागयाप्तगुणश्रिया । ॥ वोधिसत्त्वो महासत्त्वो । प्रयत्नकः सदाशुभः । ॥ त्रिविधां वोधिमासाद्य
निर्वृतिपदमाप्नुयुः । ॥ कूलादिपूंमूढीन्द्रनवलपाणिं समाप्त । ॥ गूलपुगसत्साक्रान्त हृदयश्चैवमब्रवी
त् ॥ पवमाद्भुतपुण्याहं हगवन्नयदिदंगकश्चित् ॥ धर्म्मश्रीगुणमहात्म्यं दक्षं न शक्यते पितः । ॥ तुल्यदशंपू
धसमाकं जिनानामपि न कश्चित् ॥ दृश्यते शक्यतनापि कथावर्णनमयाखिलं ॥ एवं तेनाधितो भक्त्वा हगवा
न् शिखी जिनः । ॥ वलपाणिं महासत्त्वं तमालोक्यैवमादिशत् ॥ सर्व्वा कालं शुरूवां शृण्वि श्वरूपामतिर्यथा
श्रिकास निर्महावलरूवसर्व्वहितार्थहत् ॥ कामध्यनर्यथकामसाम्यंसम्पत्तिसम्भव । ॥ कल्पवृक्षो यथा
हद्रश्रीसमृद्धिप्रदायकः । ॥ हद्रघटायथा सर्व्वसत्त्वाञ्छितपूरकः । ॥ लोकेश्वरः स सर्व्वेषां वाञ्छिता॰

गुण

र्तिपूरकस्य ॥ बोधिसत्त्वजगत्कर्त्ता विश्वनाथो जगद्गुरुः ॥ सर्व्वधर्म्माधिपः शास्ता सर्व्वलोकाधिपेश्वरः
किं वक्ष्यते तस्य माहात्म्यं बोधिश्रीगुणसंहतेः ॥ शक्रो न समाख्यातुं सर्व्वेऽपि मुनिश्वरेः ॥ तद्यथा ॥ सोऽम
हासत्त्वो दुर्द्धर्षानपि बोधयन् ॥ बोधिमार्गे प्रतिष्ठाप्य बोधयति जगद्धितं ॥ वज्रकुक्षिगुहायां तावज्जम्बूद्वी
पत्र विद्यते ॥ तत्रानेकसहस्राणि निवसन्ति ससन्नद्धिवां ॥ तत्र गत्वा सुबाणोऽसत्सान्ती पृथ्य शासन्मर
न् ॥ सद्धर्म्मं समुपादिष्टुं पश्यन्ता समुपाचरन् ॥ तं दृष्ट्वा समुपायाति मार्व्यैन ऽसत्तामूचा ॥ सर्व्वां सत्त्व
प्याप्रणत्वैव बहोषिते ॥ स्वागतं समाकस्थित्वे सर्व्वं प्रकोंगलं कपयानः समालोक्य धर्म्ममाख्यक्तु
मर्हसि ॥ एवमायद्यथादिष्टं तत्कथाव यसादनात् ॥ श्रुत्वा ध्वत्वाव मिष्यामः संसारसुखसाधन ॥

इतिसंप्रार्थित सर्व्वे यानवास्कं गुरुं मुदा ॥ सहासन प्रतिष्ठाप्य धर्म्मं श्रोतुं समुपाश्रयन् ॥ तान्सर्व्वां
समुपासीनां दृष्ट्वा सम्मुगतास्तमः ॥ देशानां धर्म्ममानसत्सद्धर्म्मं समुपादिशत् ॥ एवं ऽश्रूयतां ॥
धर्म्मं संसारसुखसाधनं ॥ वक्ष्यते तत्मयायूयं संसारदुःखमुक्तये ॥ सेत्रित्रिरत्नवकात्रभ
कविलोजिम्पन्द्रियाः ॥ दयाविक्षावसत्त्वं पूर्व ध्वंसम वाविशः ॥ ततः सप्तसमावाराः पविशुद्ध
सयामुदा ॥ त्रिरत्नशरणं कृत्वा वर ध्वीपाप धेवतं ॥ धृत्वा तत्र मनागार्त्यं संसारहजकाविशः ॥ स्प
नूध्वीबोधिकारत्थवूहसंतं गुणाषितं ॥ यत्कृत्वदं महायानश्रुत्वा जगुणाषितं ॥ त्रिरत्नशरणंग
त्वा वरति पाप धेवती ॥ तषां सर्व्वाणि पापानि पश्यन्ति तत्यकान्यपि ॥ लिः ग्धसंपतिनष्टानि हवि

गुन

ष्यन्ति सदा हव ॥ एवं श्रुत्वानुमोदन्ति तद्धर्मं श्रोष्यन्ति बादरात् ॥ ग्रहीष्यन्ति लिखिष्यन्तिः स्वाध्यास्य-
न्ति प्रभावितां ॥ एवं लिखापयिष्यन्ति वाचयिष्यन्ति सर्व्वदा ॥ सदानुचिन्तयिष्यन्ति भावयिष्य-
न्ति बादरात् ॥ परेभ्यो विस्तरेनार्थं सम्प्रदास्यन्ति सादरात् ॥ सत्कारैः श्रद्धयानित्यं पूजयिष्यन्ति स-
र्व्वदा ॥ ते एवं सुखिता धन्याः संसारसुखभागिनः ॥ नत दुर्ग्गतिदुःखानि शाक्करूपि कदाचन ॥ सद्-
सद्गतिसंजाताः संसारसुखभागिनः ॥ सद्गुणश्रीमहत्समग्रद्धिमन्तो महर्द्धिकाः ॥ बोधिचर्य्याव्रतं
धृत्वात्मपरार्थमहिताशया ॥ कृत्वा सर्व्वं त्रिरत्नानि वर्द्धयिष्यन्ति सदा हव ॥ प्रान्ते ज्ञानिस्सम्बोधिं च वो-
धिं प्रतिहिताशयाः ॥ त्रिरत्नशरणंगत्वा समाप्स्यन्ति सन्निर्वृतिं ॥ यदा कालसमायातं तथां निर्वृ-

[illegible]

तिं बोधिं लभ ॥ यादृशास्तादृशाः प्रव्रज्य समुपागम्य संमुखं ॥ उपस्थिताः समालोक्य स्तूपापूर्णस्तूपाक-
नेसंपश्यन्ति समाश्वास्य मानयन्त्येवमादरात् ॥ माहेश्वरीः कुलपुत्रात्र निष्ठालब्ध्वा सुधीवरा
यन्नस्मायान्तु कामशुब्रूहस्तं स्वयाश्रुतं ॥ नतेनास्ति भयकिञ्चिद् दुर्ग्गतिं च कदाचन ॥ गमनाय
शुत्वा वशांमार्ग्गास्यपतिशाश्वित ॥ पूर्व्वमर्थसुखावसांयि बालंकालसूपदां ॥ दिव्याम्नश्रु रागण-
वैः सख्यपितंमहनुमः ॥ ॐ स्वासस्वास्यमूणी ब्राह्मणांसुधकाद्दशांसुखावती ॥ निवासिताहनाथस्यस्य
पथयूः सहासन ॥ तत्रामितात्नाथस्य पित्वा धर्म्मामृतं सदा ॥ बोधिचर्य्याव्रतं धृत्वा प्रवस्वस्य ॥ सदा
पितः ॥ क्रमाण बोधिसत्वावं पूजयित्वाऊगज्जिनं ॥ त्रिविधां बोधिमासाद्य समाप्स्यन्ति सन्निर्वृतिं ॥

इत्येवं सुगतेः सर्व्वैः समाख्यातं मया श्रुतं ॥ तथा मयोदितं श्रुत्वा यूयं सर्व्वे नुमोदय ॥ यद्येवं नि
र्वृतिं गन्तुं सर्व्वे यूयं समिच्छथः ॥ त्रिरत्नशरणं गत्वा चरत पोषधं व्रतं ॥ महायानसूत्रराजं
कारण्डव्यूहमुत्तमं ॥ श्रुत्वा सदा समाधायः चरत बोधिसम्वरं ॥ एतत्पुण्यानुभावेन सदा शु
द्धा सदा सुखं ॥ निःक्लेशा विमलात्मानः परिशुद्धत्रिमण्डलाः ॥ बोधिचर्याव्रतं धृत्वा संचरन्तो
जगद्धिता ॥ बोधिसत्वा महासत्वाः सर्व्वसंसारपारगाः ॥ ततः प्रान्ते सुखावतीं गत्वा भुक्त्वा महत्सु
खं ॥ सद्धर्म्मममिताभस्य श्रुत्वा शुभं चरिष्यथ ॥ ततोपि बोधिसंभारं पूरयित्वा यथाक्रमं ॥ त्रिवि
धां बोधिमासाद्य संप्राप्स्यथ सुनिर्वृतिं ॥ एतन्मया समाख्यातं यदि निर्वृतिमिच्छथः ॥ श्रुत्वा यथा

यथादिष्टं तथा चरत सर्व्वदा ॥ इति तेन समादिष्टं श्रुत्वा सर्व्वेपि तत्सुताः ॥ तथा मतमनुमोदित्वा तथा
चरितुमैच्छत ॥ ततस्ते मानवाः सर्व्वे निर्वृतिसुखवाञ्छिणः ॥ तमाचार्यं पुनर्नत्वा प्रार्थयन्नेव
मादरात् ॥ भास्कर त्वत्समादिष्टं श्रुत्वा वयं प्रबोधिताः ॥ तथा चरितुमिच्छामस्तत्समादेष्टुमर्हसि
इति तैः प्रार्थितं श्रुत्वा [illegible] ॥ सर्व्वांस्तान्समुपागतान् समामन्त्र्यैवमादिशत् ॥
हे भद्रकाः सुताः सर्व्वे शृणुत तन्मयोदितं ॥ श्रुत्वानुमोदनां कृत्वा चरत तद्व्रतं सदा ॥ यूयं सर्व्वे
महायानसूत्रराजवरोत्तमं ॥ कारण्डव्यूहमाकर्ण्य प्राप्नुयात प्रबोधिताः ॥ प्रातस्तीर्थजलस्नात्वा
शुद्धशीला जितेन्द्रियाः ॥ त्रिरत्नशरणं गत्वा ध्यात्वा लोकेश्वरं प्रभुं ॥ यथाविधि समभ्यर्च्य जपस्तो

गुण

गाभिनन्दने ः॥ सत्कारैः प्रार्थनां कुर्य्यात् ः सम्बोधिव्रतसाधनं ॥ एवं व्रतं समाध्यैव वर्षे समागते निवा-
सिते ः॥ भोजने स्थितिपर्य्याप्य कुर्य्यात् स्नात्वा च तं सदा ॥ एवं नित्यं यथाशक्ति मासे मासे सिते सित-
अष्टम्यां पञ्चदश्यां व्रतं कुर्य्याद् यथाविधिं ॥ वर्त्तेत तद्व्रतं नित्यं मासे मासेपि सर्व्वदा ः॥ अथैकवा-
र्षमप्येवं वर्षे वर्षे तु कार्त्तिके ॥ कार्त्तिकस्य व्रतं कर्म्म तत्फलं बहुमङ्गलं ॥ अप्रमेयमसंख्येयं न
क्षयं याति कदाचन ॥ इति मत्वा समाधाय वर्त्तेत तद्व्रतं सदा ः॥ एवं स समुपादिश्य जगद्धितं समु-
पादिशन् ॥ तदाचार्य्यसमादिष्टं श्रुत्वा सर्व्वेपि ते सुराः ः॥ यथाविधिं समाधाय प्रचेरुस्तद्व्रतं
सदा ॥ ततस्ते दानवाः ः सर्व्वे व्रतपुण्यविहायिनः ः॥ बोधिसत्त्वा महासत्त्वा बभूवुस्तेपि दानवाः

६०

एवं स स महासत्त्वो दुर्ग्गतिकानपि दानवान् ॥ बोधयित्वा प्रयत्नेन बोधिमार्गे प्रयोजयन् ॥ एवं तं स जग-
शास्तुः पुण्यस्कन्धमहर्द्धिकं ः॥ अप्रमेयमसंख्येयं इत्याख्यातं मुनीश्वरैः ः॥ एवं स त्रिजगन्नाथस्-
लोकेश्वरो जिनात्मजः ः॥ स्वयं पश्यञ्जगत्सर्व्वं पालयति सदा भवे ॥ पापिष्ठानपि दुर्ग्गतिकानपि यत्ने ः
प्रबोधयन् ॥ बोधिमार्गे नियुज्यैवं प्रापयति स्म निर्वृतिं ॥ तेनासौ जगतां शास्ता सर्व्वलोकाधिपेश्वरः ः॥
भजनीयः ः सदा सद्भिः सम्बोधिज्ञानवाञ्छिभिः ः॥ तस्य नाम समुच्चार्य्य स्मृत्वा ध्यात्वा च सत्क्रियाः ॥ ते नू-
नं बोधिमासाद्य निर्वृतिं समवाप्नुयुः ः॥ इत्यादिष्टं मुनीन्द्रेन जलपाणिर्निशम्य च ः॥ प्रबोधितः प्र-
बोधितः ः प्रसन्नात्मा प्राभ्यनन्दत् सपार्षदः ः ॥ इत्येवं शिखिनादिष्टं सम्बुद्धेन मया श्रुतं ॥ लोकेश्व

गुण

नस्य महात्म्यं पुण्यस्कन्धमहत्फलं ॥ इति मत्वा भगवत्सर्व्वे पुण्यस्कन्धमहत्फलं ॥ सत्वा नाम समभ्यार्च्य
धर्म्मन्त्वापि गुरूनास्सदा ॥ तस्य नाम समभ्यार्च्य सत्वा धर्म्मन्त्वा गुरूं किय ॥ ते सर्व्वे विमलात्मानः संयान्ति
सुखितस्सुखावतीं ॥ तत्रामिताभनाथस्यापित्वा धर्म्मामृतं सदा ॥ बोधिचर्य्याव्रतं धृत्वा संवरकाभगाः
भिन ॥ बोधिसत्वा महाभिज्ञाः परिशुद्धत्रिमण्डलाः ॥ त्रिविधां बोधिमासाद्य निर्वृतिपदमाप्नुयुः ॥
इत्यादिष्टं मुनीन्द्रेन श्रीघनेन सपार्षदः ॥ श्रुत्वा सर्व्वनिवर्णविष्कम्भी प्राभ्यनन्दतः ॥ ० ॥
इति श्रीगुणकारण्डव्यूहे महायानसूत्रे सर्व्वाकाल सर्व्वसत्वप्रबोधनसद्धर्म्मश्रावणप्रकरणं ॥
। ❀ ॥ अथ सर्व्वनीवर्णविष्कम्भी सभितानासभ ॥ भगवन्तं मतिन्द्रकं प्रनत्वैवमब्रवीत् ॥ इच्छ

७१

हं भगवन्नस्य लोकेश्वरस्य दर्शनं ॥ सद्धर्म्मश्रवणं वापि सर्व्वत्रैधातुकेष्वपि ॥ कदा सो भगवानार्य
लोकेश्वरो दृष्टवान्भवेत् ॥ इच्छामि द्रष्टुमहं साक्षात्तं लोकेशं सर्व्वाधिपतिप्रभुं ॥ इति तेनादितं श्रुत्वा भगवान्स
मुनिश्वरः ॥ विष्कम्भिनं महासत्वं तमालोक्यैवमादिशत् ॥ भूयस्तस्य भगवतो लोकेशस्य महात्मन
सद्धर्म्मगुणमाहात्म्यं वक्ष्यामि शृणु तावदात् ॥ अस्मिंद्वीप्यस्ति काशेन्यमयोरुमीर्मनोरमा ॥ तत्रानेकस
हस्राणि निवसन्ति समस्तराक्षिषां ॥ तत्रासौ भगवान्गत्वा आर्यलोकेश्वरो विलोकयन् ॥ सर्व्वांस्तान्त्राक्षसीं दृष्ट्वा
भूतसम्बुद्धे सुमपावनन् ॥ ददर्शतां महाहृष्टां दशाकुशलसंवृतान् ॥ मदमानादिदर्पान्धा क्लेशाग्निता
पिताशयाः ॥ संपश्यं करुणात्मा स्मे त्रिकायात्म्यलेप्याधिता: ॥ पश्यन्सस्मिंस्तमस्तस्य प्राभासयन्नुपावनन्

गुण

तदृक्षिप विसस्मयुस्ता॥ सर्वाः सुखान्विताः॥ अथाहं तत्समाधानं विलोक्य एवं विचिन्तयन्॥ अहो कुतो ऽयं
कालिकाप्रायाज्ञः प्रसारितः॥ यया अस्य प्रभावं सर्वं महतो ऽप्यसमन्विताः॥ इति विचिन्तयता कथयामास ता
लक्ष्यकालिकानामगुरुः॥ पूर्वमाचार्यमुख्य लसन्प्रत्यर्थं समुपावदत्॥ तमेवं समुपायान्तं दृष्ट्वा सर्वे ऽपि ते स्तुवा
नाः सुप्रसन्नाः समागम्य प्रणम्यैवं बभाषिरे॥ स्वागतं ते शिवं कच्चिद्विजयस्वागतं कुतः॥ प्रविश्यतामास
नं ऽस्मत्पूर्वकार्यं समादिश॥ इति तैः प्रार्थितं गुरुः स्वासमासन्नमाश्रयत्॥ सर्वान् कांश्च समुपासि
तान् समालोक्यैवमब्रवीत्॥ कस्यायं कालिका ऽयातो यस्य ऽहं नाम लक्षणं॥ मत्प्रश्ने किं हि स्तद्वदत
मिहाययत॥ इति तेनादितं गुरुस्ता सर्वे तदानवाप्यपि॥ ऽस्माकं समालोक्य प्रत्यूचुरेवमादरात्॥

३२

नजानीमो वयं ऽस्माकं कस्यायं कालिकागतः॥ तद्भवान्नः समादिश्य प्रबोधयितुमर्हति॥ इति तैः प्रार्थितं
गुरुः स्वामी आचार्यो विलोकितं॥ सर्वान् तदहं तं प्रभुकामानेवमभाषत॥ शृण्वन्तु तदहं वक्ष्ये यदि यत्का
लिकागतः॥ गुरुस्वामी यत्प्रथयाख्यातं तथा वदितुमर्हथ॥ इति तेन समादिष्टं गुरुः स्वा सर्वे ऽपि ते स्तुवाः॥ सु
प्रसन्ना गयानत्वा तं गुरुं भवमकुर्वन्॥ ऽस्माकं हे वात्सल्य दसाकमाचार्यो धर्मदेशकः॥ तदत्र दत्तुं तं त्वा
तं समुपादेष्टुमर्हति॥ इति तैः प्रार्थ्यमानाः सत्सूर्याचार्यस्तत्प्रसादितान्॥ सर्वान् विस्मयसंपन्नान् समा
लोक्यैवमादिशत्॥ शृण्वध्वमादरात् यूयं सर्वं तत्र मया दितं॥ यद्वं महत् तं ज्ञानं बोधयितुं प्रवक्ष्यामि त
यथा यात्रागत्वाथ सर्वज्ञे धातुकाधिपः॥ जगत्कस्त्रा जगत्करुणा बोधिसत्त्वकिनामतः॥ महासत्त्वाम

त्राहि हृ ॥ आर्यावलोकेश्वरः ॥ स त्रिकालप्रसन्नात्मा लोककरुणामय प्रभवः ॥ सर्वलोकेश्वरः श्रीमान् स-
द्धर्मपुण्यभास्करः ॥ सर्वान् सत्त्वान् समुद्धर्तुं वर्वर्तते त्रिभवेष्वपि ॥ सर्वत्र सततं लोके सर्वान् सत्त्वान् प्रबोधय-
न् ॥ बोधिमार्गे प्रतिष्ठाप्य प्रेषयति सुखावतीं ॥ स एवं सर्वलोकेषु सर्वभूतालयेष्वपि ॥ निमग्नांस्तान् प्रा-
णिनो दुःखानपि सत्त्वान् विलोकयन् ॥ पूर्वशुक्लाकरेऽस्य त्रासमूहस्य प्रबोधयन् ॥ बोधिमार्गे प्रति-
ष्ठाप्य प्रेषयति सुखावतीं ॥ दिवा दिने समालोक्य गतसमूहस्य प्रबोधयन् ॥ शुभमयानसर्व्ययान् सत्त्वा-
न् प्रेषयति सज्जनो ॥ एवं कृत्वा स लोकेशो महत्पुण्ये समन्वितः ॥ सर्वधर्माधिपः शास्ता धर्मराजो जग-
त्प्रभुः ॥ बोधिसत्त्वो महासत्त्वः सर्वसत्त्वहितार्थकृत् ॥ सर्वविद्याधिपो धीमान् सम्बोधिज्ञानभास्करः ॥

ष्वपि स समागत्य सर्वान् सत्त्वान् प्रबोधयन् ॥ बोधिमार्गे प्रतिष्ठाप्य स प्रेषयति सुखावतीं ॥ स एवं स-
मागन्तुं पुण्यवन्ति समुद्धर्तुं ॥ प्रणामय जगल्लोकं सर्वेऽपि नरकत्रिभालयान् ॥ तस्य पुण्यप्रभा काऽपि वि-
द्यते न प्रभासिता ॥ तथा पूर्वं प्रविष्टा महत्पुण्यसमन्विता ॥ तत्सम्भावनं कृत्वा ध्यात्वा स्मृत्वापि सर्वदा:
नामापि च समुच्चार्य नत्वा तं तु समर्हथ ॥ यतस्तद्भावनं कृत्वा ध्यात्वा स्मृत्वा समादधातु ॥ उत्तमयानाम प्रा-
प्तार्यस्तु त्वा न त्वा तत्रापि ॥ सर्वपि तन् ज्ञायकः दुर्गति पूर्कपावन ॥ सदा सम्मति संज्ञाता श्वयन्ति सर्व-
दा शुभे ॥ विनतमानसं वाचः सद्धर्मगुणलालसः ॥ सर्वसत्त्वहिताधानसम्बोधिव्रतकामिनः ॥ त्रिरत्न-
हेऽन्ता लोहाव भुक्त्वा विहारिणः ॥ तड श्रीगुणसम्पत्तिसमृद्धाः सद्गुणाकराः ॥ यावज्जीवं सुखं भुक्त्वा

गुअ

स्वपरात्महितार्थतः ॥ बोधिचर्य्याव्रतं धृत्वा सत्वसंवनेगगच्छत ॥ तदाकर्ण्य समयतथागतो लोकनाथस्ससंमु-
खं ॥ उपागत्य समाश्वास्य संदयायेवं वदत्सुत ॥ माहे भो कुलपुत्रात्र किञ्चिन्तनं त्वयं कृतं ॥ त्रिरत्नभजनं
कृत्वास्ते के नथ सत्सम्भवेत ॥ तथापि यावद्भवे लोके बोधिचर्य्याव्रतं चरन् ॥ कृत्वा सत्वहितं सौख्यं भुक्त्वा प्राप्य
बुद्धिविशः ॥ तत्रापि त्वं महासौख्यं भुक्त्वा ववत्सयाशुरे ॥ एवं मत्वा समाधाय स्तुत्वा वन्दत्रयं सदा ॥ नि-
त्यं समाविधिच्छं मत्तापि सत्सुखं सरेत् ॥ सर्व्वखामपि कृत्वां संसारमभवं ध्रुवं ॥ त्वं सुखनैवमू-
तकार्य्यधिधामवाप्स्यसि ॥ यावज्जीवं यथाकामं भुक्त्वा स्वर्गेमलेषु सद् ॥ तत्राऽपि सुखनैव यायायत्म-
सुखावतीं ॥ तत्रगत्वा मितायस्य जिनस्यानुशासितः ॥ सदाधर्म्मामृतं पित्वास्यै र्बथा सुसंव

ॐ

र ॥ तत्रैवं सुविनं भुक्त्वा सद्धर्म्मश्रीसुखावहं ॥ प्राक्‌बोधिं समासाद्य समाबुध्य मुनिर्वृतिं ॥ ततः सुक-
सुनयतथागतो लोकनाथस्ससंमुखं ॥ समागत्य समाश्वास्य संदत्वाहयं समर्प्पयत् ॥ ततः सत्यं समाख्या-
तं सर्व्वेनापि सुनिश्चने ॥ श्रुत्वं मया तथाख्यातं श्रुत्वानुमोदवर्य्यतां ॥ एवं मत्वा स्वैलोकनाथस्य शास-
नंगताः ॥ स्मृत्वा नाम समुच्चार्य्य भक्त्या हृतत्सर्व्वदा ॥ तथाव सर्व्वदाहर्डनिवृत्तानं तव ध्रुवं ॥ यावज्जीवं
सुखं भुक्त्वा यायात्कामसुखालयं ॥ तत्रापि सुविनं भुक्त्वा दिव्यकामसुखोत्सवं ॥ ततोऽन्ते समये च्युत्वा ते
यास्यन्ति सुखावतीं ॥ तत्रगत्वा मिताहस्य सर्व्वदा समुपस्थिता ॥ पित्वा धर्म्मामृतं पूर्ण्णं महत्साहेत्वमिच्छ-
था ॥ तत्रापि शुविनं भुक्त्वा सद्धर्म्मश्रीमहोत्सवं ॥ प्राक्संबोधिं समासाद्य समवाप्स्यथ निर्वृतिं ॥ ततः जिननस

गुरु

मादिष्टं तयासनमुपस्थितः॥ पीत्वा धर्म्मामृतं पूर्व्वं सहास्माद्देश्वविषयथ॥ तत्रापि स्थविरं गुप्तं सद्धर्म्मे
श्रीमतस्तवं॥ प्राक्संबोधिसमाख्याय समवाप्स्यथ निर्वृतिं॥ इति तेन समादिष्टं श्रुत्वा सर्व्वेपि तःस्तना
ः॥ तथेति प्रतिविज्ञाप्य बोधिमार्गेवमब्रुवन्॥ भस्तास्तथा करिष्याम यथादिष्टं त्वयाधुना॥ सूयामत
सयातस्य नाथस्य शरणं गताः॥ स्तुत्वा ध्यात्वा समुच्चार्य्य नामापि प्रणताम्नत्॥ तदस्माकं हितार्थेन तथा
कल्परुगद्युताः॥ व्रतस्यापि विधानं च समुपादेष्टुमर्हति॥ इति ते प्रार्थितं श्रुत्वा सत्स्वार्य्यो प्रबोधिता
ः सर्व्वान्तान्दानवान्दृष्ट्वा पुनरेवमुपादिशत्॥ शृणुध्वमतस्तं वक्ष्यामि व्रतविधिं समासतः॥ गृपोती र्थे
नले स्नात्वा शुक्लशीला जितेन्द्रियाः॥ वस्त्र विहारे गत्वा च मिलित्वा पापधं व्रतं॥ त्रिरत्नशरणं गत्वा ध्या

ॐ

सांघं शरणं गतास्ततः॥ ततश्चैवं समाराध्य समभ्यर्च्य यथाविधिं॥ उपस्थानादिभिस्तुत्वा कृत्वा चापि प्रदक्षि
णा॥ स्तुत्वाथ प्रणतिं कृत्वा स्मृत्वा चावसमादरात्॥ नामानि च समुच्चार्य्य दत्वा श्रुत्वापि तद्गुणान्॥ प्रसन्ना
मपितोषित्वा प्रकाशित्वाव सर्व्वतः॥ सत्कृत्य श्रद्धया सर्व्वं उपकरणवस्तुभिः॥ यथाशक्ति समभ्यर्च्यैव
न्दित्वा हरतादवं॥ एवं नित्यं समाधाय चतुःसंध्यादिनं दिनं॥ यथाशक्ति तदूर्ध्वं ध्यात्वा स्मृत्वापि तावत
ः॥ प्रत्यहमेकवाराच्चामासमासेपि वा तिथौ॥ अष्टम्यां पूर्णमास्यां वा तदूर्ध्वं सर्व्वदा तथा॥ एवं विधाय
सर्व्वनियूय मनतुनोविताः॥ यथाकं तत्फलं प्राप्य तूनं याथस निर्वृतिं॥ इति तेन समादिष्टं श्रुत्वा स
र्व्वेपि तःस्तनाः॥ प्रबोधिताः प्रमादकस्तथा च विरमीस्थिव॥ ततस्ते दानवाः सर्व्वे हृष्टा कामसदमानिन

गुण

उर

॥ अप्यनल्पसत्त्वोरवं प्रकाममुदिताशयाः॥ शुद्धशीलाः प्रसन्नाश्च सद्धर्मगुणलालसाः॥ विर
तपापसंचाराश्च ब्रह्मविहारिणः॥ ततस्ते शास्ताय यथादिष्टं तथा भयसमादरात्॥ तस्यैव लोकनाथस्य
प्रकृत्वाशयं तं मुदा॥ ध्यात्वा स्मृत्वा समादानां समन्वार्य्य यथाविधि॥ पात्रचीवरं धृत्वा श्रावक-
काः समाहिताः॥ यथाशक्ति समरूपैर्वस्तूपकरणैरपि॥ कृत्वा प्रदक्षिणान्येव कृत्वा च प्रणतिं मुद-
ः॥ मुदा तेऽप्यभिवन्दित्वा प्रहृष्टाः समावसन्॥ एवं तदा तु ते सर्व्वे साधवो जितेन्द्रियाः॥ शुद्धशी-
लाः शुभाचाराश्च ब्रह्मविहारिणः॥ परस्परहितं कृत्वा सद्धर्मगुणसाधिनः॥ बोधिचर्याव्रतारूढ-
रूढा बोधिविहारिणः॥ एवं ते दानवाः सर्वे नामाचार्य्यः प्रबोधयन्॥ बोधिमार्गे प्रतिष्ठाप्य समामनु

७४

गताश्चरन्॥ ततः सोऽर्हन्तः स्वस्य प्रकाशयन् सम्मतः॥ धृत्वा लोकेश्वरामूर्त्तिं सर्वान्स्तान्समद-
र्शयन्॥ तस्मात्कालं प्रकाशाक्षं लोकेश्वरं जिनात्मजं॥ दृष्ट्वा ते दानवास्सर्व्वे सर्व्वेव बभूवुर्विस्मयान्विताः॥
ततस्ते प्रणतिं कृत्वा गत्वा तं शरणं मुदा॥ उपस्थानादिभिस्तुत्वा वन्दित्वा प्रार्थयंस्तथा॥ नमस्ते भगवन्ना-
थ शरणयातं शरणे रक्षिताः॥ बोधिचर्याव्रतं धृत्वा चरामस्तत्प्रसिद्धये॥ यदस्मदपराधं तत्क्षन्तव्यं भवता
सदा॥ एवमस्मात् समालोक्य संपालयितुमर्हति॥ इत्येवं ते सुराः सर्वे प्रार्थयित्वा समादरात्॥ अस्य
जिनपितं तत्त्वापस्थाय एवं स्थिता॥ ततः स त्रिरत्न गत्वाथ दत्वा तपोजयाशिषं॥ ततः सोऽर्हन्ताय्यत्र स-
त्वान्तर्द्धातुमावसत्॥ ततस्ते दानवाः सर्वे त्यापि धर्मलालसाः॥ त्रिरत्नभजनं कृत्वा संप्रचरन्तः स

गुणा

पाशुरा॥ एवं स त्रिजगन्नाथो नानारूप्यमवाभासयन्॥ दुर्दान्तानपि सत्कर्मे नियोजयति यत्नतः॥ त
नास्य त्रिजगद्गुरुपुण्यस्कन्धं महद्भुतं॥ अप्रमेयमसंख्येयमित्याख्यातं मुनीश्वरैः॥ इत्यसौ त्रिज
गन्नाथः सर्वलोकाधिपेश्वरः॥ सर्वज्ञः सुगतः सर्वैः प्रशंसितः सदादरात्॥ इतितस्य जगत्
लोके पुण्यमहात्म्यसत्कथां॥ श्रुत्वानुमोदनां कृत्वा प्रसंस्यन्ति समन्ततः॥ इति मत्वा सदा तस्य·
लोकनाथस्य शासनाः॥ श्रद्धया भवद्भिश्चित्वारकम्पं सत्सुखार्थिभिः॥ इत्येवं शिखिनाख्यातं सम्बु
द्धेन मया श्रुतं॥ तथात्र वः समाख्यातं श्रुत्वानुप्रतिबुध्यतां॥ एवं मत्वास्य महात्म्यं सत्कर्मगुणवा
ञ्छिभिः॥ कर्त्तव्याः सदा रत्नध्यानस्मृत्वा हि भावतः॥ यत्नस्य भवतां श्रुत्वा ध्यानस्मृत्वापि भाव

[illegible]

तः॥ नामापि च समुच्चार्य्य भजन्ति सर्वदा मुदा॥ ते सर्वे विमलात्मानः सम्बुद्धश्रीगुणाकराः॥
बोधिसत्वा महासत्वा भविष्यन्ति जिनात्मजाः॥ इति शास्त्रा मुनीन्द्रेन समादिष्टं निशम्य ते वि
ष्कम्भीप्रमुखाः सर्वे प्राप्तनन्दं प्रबोधिता॥ ॥इति श्रीगुणकारण्डव्यूहे महायानसू
त्रे दुर्दान्तदानवप्रबोधनशाखिवर्ण्णावदानप्रकरणं॥ ❀ ॥अथासौ भगवाञ्छास्ता
श्रीघनस्त्रिजगद्गुरुः॥ विष्कम्भिनं महासत्वं संपश्यंश्चैवमब्रवीत्॥ भूयोपि कुलपुत्रास्य लो
केशस्य महद्गुणं॥ श्रुतं मया तथा वक्ष्ये तच्छृणुत समादरात्॥ तद्यथाभूत्पुरा शास्ता तथाग·
तो मुनीश्वरः॥ सर्वज्ञार्हं महाभिज्ञो धर्म्मराजो विनायकः॥ सर्वधर्माधिपो नाथः सर्व॰

गुत

विद्याधिपश्चरः॥विश्वभूनामसम्बुद्धोभगवांस्तथागतोजिनः॥तदाहंकुलपुत्रासंक्षाकिपादीति
विश्रुतः॥महर्षिःतापसोभाषीमौसंयतिविजितेन्द्रियः॥गिरिगुहांसमागृह्यःसंबोधिध
र्मसाधकः॥बहुबन्सत्वहितंकृत्वातनुत्रस्कविहारिकः॥तदाप्यस्यजगच्छास्तुर्लोकनाथस्यस
हलुवं॥गुणप्रभावमाख्यातंविश्वभुवंश्रुतंमया॥तथथासौजगच्छास्ताविश्वभुर्भगवांजिनः॥
तद्वनायकोभगम्यवीतरागसमाधिकः॥तदासभगवान्तत्रसर्वलोकसभाश्रिताः॥सद्धर्मसं
मुपादिशत्सत्वानांक्षेमनादयन्॥यदैकसमयेतत्रभगवान्समुलिश्वबः॥आर्यधर्मसमुपाश्रवू
सत्रासनसमाश्रयत्॥तदातत्रमहाश्रसिबवलाशसमन्वितः॥सर्वत्रमणिजलंकृत्वाश्चाय्यकि

ॐ

समासनत्॥तद्रश्मिसंप्रविस्पृष्टाःसर्वसत्वाःसुखान्विताः॥तदद्भुतंसमालोक्यविस्मयंसमुपाययु
ः॥तदागगनगञ्जाख्योबोधिसत्वोमहामतिः॥सर्वास्तांविस्मयापन्नालोकान्दृष्ट्वासमुत्थितः॥उद्ध
त्रूरूवांसंगंसोञ्जलिःपुरतोगतः॥विश्वभुवंमुनीन्द्रंतंनत्वैवंपर्यपृच्छत॥भगवन्नूर्ध्वप्रभाका
किःकस्यहयंसमागता॥ययास्पृष्टाअमीलोकाःमहत्सुखसमन्विताः॥विस्मितास्तत्समालोक्य
भगवन्तंमुनीश्वरं॥तद्भुतंश्रोतुमिच्छन्तःसर्वेतस्थुःसमाहिताः॥तथाहृदयास्कःस्कहृय
द्भुतकौतुकं॥विलोक्यदिक्षुमिनंहस्तुकस्यातिमदृपादिश्र॥ॐमितनादितंश्रुत्वाविश्वभुःमुनिश्व
रः॥विलोक्यतंसमाहासत्वंगगनगञ्जमब्रवीत्॥शृणुत्वंकुलपुत्रात्रयकाकिनागताः॥तद

गुण

दंसंप्रवक्ष्यामिशृणुध्वंसमनुमोदतः॥ याकाशेनसमयितत्सौर्ग्गस्यसौप्यतुविघ्नतः। तस्मात्सुखामुखा
ःसत्वानिनसक्तिप्रभायिकाः॥ तान्सर्व्वापापिताह्नस्त्यम्भंसमस्तानातसङ्गः॥ लोकेश्वराःसमत्कर्तु
मुखावस्थांहृदागतः॥ तथांपापविनाशार्थंपूज्यवासिसमूलकंजन्॥ तासयंसतगलोकानन्तताय
तिकृपानिधिः॥ तस्महापापिसस्पृष्टाः सर्व्वतसत्त्वसुखंविनाः॥ किमनतयिमिसंबोध्यतिष्ठतिविश्वि
तागयाः॥ तदातत्सत्वानभिवृष्यरागयतन्॥ सर्व्वानअमुखांसत्वान्नपेक्षितांविलोकयन्॥
नमर्षिसत्प्रहासकंसमायातंविलोक्यतः॥ सर्व्वेप्यअमुखासत्वाःसमुपायाकिसन्मुखं॥ ततस्तर्व्व
पितसत्वाःप्रहातानमुनिंमुदा॥ गुरूणजनप्रतिष्ठाप्यप्रार्थयंतुवमादरात्॥ महर्षेयदिहायासि

तदस्मत्तागतायागतः॥ तद्भवान्कृपयास्माकंदेवमाख्यातुमर्हसि॥ किन्तकर्म्मपातकंघोरमस्माभिःप्रकृतं
पुरा॥ येनास्माअमुखास्सर्व्वेवयंजाताइहद्रसा॥ इतितैःप्रार्थितंश्रुत्वासमहर्षिर्विलोक्यतान्॥ सर्व्वान्न
अमुखान्सत्वान्समादिशतिबोधयन्॥ शृणुध्वंयत्पुराकर्म्मयुष्माभिःप्रकृतंयथा॥ तत्समुद्दिशाम्य
हंश्रुत्वाफलंनिवृत्यतां॥ यत्त्रिबलंप्रतिक्षिप्यमदर्प्पामानगर्व्विताः॥ यूयंस्मितिहाबन्धावबलाअमु
खाःपुरा॥ तेनैतद्दैवयोगेनयूयंसर्व्वेप्यअमुखाः॥ दुःखानिविविधान्यत्रभुञ्जावसथसांप्रतं॥ तदत्रगुरुणा
पूयंत्रियत्नगावदीनाताः॥ अत्वास्मत्तासमत्र्यार्यनामापिहठनादवान्॥ पापधर्म्मध्रुवंकत्वावत्तुवृक्षवि
हाविदाः॥ स्वपवालहितंकृत्वास्यैश्चवध्वैसदागुरुः॥ ततःसम्यग्विविक्तेनधृत्वाबाधिबुद्धिनसदा॥ त्रिबलर

धा ३

गुह

गता सार्द्धं सत्वैर्बद्धं गगणित॥ तथायुयं विकलाबाधमिशुहृति मञ्जुलाः। निःक्रमणाद्विमासाय नि-
र्दष्टिं शुरवसाम्यथ॥ इतीतनसमादिष्टं श्रुत्वा सर्व्वे पितमूदा॥ तस्यपादौ पूनर्नत्वा पूनह्लिखेवमब्रु-
वन्॥ नाथासि त्वं जगल्लोकसद्धर्मसुरवसम्प्रदः॥ शान्तास्य तदस्माकमध्यानां पापवाविनां॥ तथाहि
सतहृष्टिनां प्रटाम्पथवाविनां॥ अनाथानां सपित्रादीनानां मूल्यवतां॥ त्राणगतवरे शून्यानां सद-
नां दुःखहारिणां॥ धर्म्मदीपं समुक्कात्य दर्शय निर्वृतः पथः॥ दत्वा सत्सुरवसंपत्तिं नाथ कर्त्तुमर्थ-
सि॥ दत्वापूर्णं जनापायं संमित्राहवसंमतिः॥ इत्यर्तितं तवदायायं प्रदत्वा हवसज्जति॥ सज्जनिगाम-
नापायं दत्वा शास्त्राग्रवर्त्तव॥ निर्वार्य पापसंगतान्प्रज्ञा नाक्रम पहारव॥ इवर्हि क्रगसंतापं हत्वा हव १०

गतेतकथ॥ सद्धर्म्मसाधनात्तातं हं दत्वा हव विनायकः॥ सद्गुणसुखसंपत्तिं दत्वा हव सज्जनप्रभुः॥ सद्धर्मं
समुपादिश्य वानयासास्तान्समुत्तर॥ विमुक्तिसाधनापायं दत्वा प्रवयनिर्वृतिं॥ अन्यानासमस्तिवनायतस्तत्तं
गवरेरक्षिता॥ सत्वानामसमुद्धार्य्य ध्यात्वा हरुक्तिं सर्व्वदा॥ इत्युदुःखं न तक्कापि यास्मक्तिहवावगेणया
याद्वयमिदं दुःखमनूहवामहस्तदा॥ तस्तृतग्ध्यमहस्त्वायस्तदा नउपस्थिताः॥ शादिमध्यान्तकल्याणं
धर्म्मं श्रुत्वा वयमिक्षिवेः॥ वयमपि तथा सर्व्वे शातरेरक्षिताः॥ धर्म्मं श्रुत्वा सकल्याणमिक्षामस्य विमुक्तुवर्त्मं॥ तत्
प्रसिदसहर्षं यमसान्नूसमन्वत॥ इति तैः प्रार्थितं श्रुत्वा समहर्षितैः प्रसादितान्॥ तां सर्व्वान्समुपामन्त्र्य स-
मालाक्षेवमादिशत्॥ शृणुध्वं सादरं यूयं सदारुडं यादिकथ॥ हितार्थं वः प्रवक्ष्यामि सद्धर्म्मं बोधिसाध

गुण

नं ॥ ॐ स्वादिश्यः सकालन्गुणव्यूह गुतुं गुणभाषितं ॥ उत्साय्ये अक्षयं बोधिचर्य्यायां याचयं स्वपि ॥ ततस्क पू-
षाः सर्वे संधर्म्मसाधवायता ॥ त्रिरत्न शरणं कृत्वा संवरक्रमसंवर ॥ ततस्क विमललालास ॥
पविशुद्ध त्रिमसुला ॥ बोधिचर्य्यां व्रतं धृत्वा सर्वे रक्षागछिता ॥ सर्व्वेपि ततमहासत्वा बोधिसत्वा मह-
र्द्धिका ॥ परमसुखसक्रान्ता हव्यप्यनिवर्त्तिनः ॥ एवं संत्रिजगन्नाथ सर्षिर्प्यन वाभयस्त ॥ स-
र्व्वास्तां बोधिचर्य्यायां नियुक्त वानयस्तपि ॥ एवकां बोधिमार्ग्गे सोमहर्षिः स्तत्रियुक्तव ॥ ततांकर्द्दि
ता काणया निवर्द्धिलिवाजलन् ॥ तमाकाशगातहृष्टा सर्व्वेत प्यतिविलिता ॥ प्रणतावानुगंसक्र स-
त्वकृ समादवानु ॥ तस्य लोकेश्वरस्यापं पुण्यकान्ति शुराप्रहा ॥ सुवतास्य जगलोक सिद्धापिसं

गौ १

प्रसादिता ॥ एवं संत्रिजगन्नाथ लोकेश्वर नाम जिनात्मजः ॥ सर्व्वसत्वहितं कृत्वा प्रववाक्रिसमन्वित ॥ त-
नस्यमहत्स्पृष्ट्य स्कन्धं वद्धसमूरुमं ॥ सुपुण्यमयमसंख्येयं ॐ स्वादिष्टं मुनीश्वरे ॥ एवं विहायस-
र्व्वस्य लोकेशस्य सदादनात् ॥ सत् लोकेश्वर समूचार्य्य नामापि हक्कुमर्हथ ॥ यतस्य भवनं गत्वा स-
लोकेश्वापि सर्व्वदा ॥ नामापि च समुच्चार्य्य हक्किमुद्र्यामूदा ॥ दुःखान्निर्गतकल्पि संजाता सद्-
गतीं सदा ॥ धर्म्मश्रीगुणसंपत्ति सुखायानि सर्वाणि ते ॥ ॐ स्वादिष्टं मुनीन्द्र तं विश्व गुवानिशम्यत
॥ सर्व्वसत्वानि लोकाः प्रावृत्तन्तं प्रबोधिता ॥ ॐ सर्वलोकनाथस्यापि पुण्यप्रभावम् उत्तमं ॥ विश्वभु
या मुनीन्द्रेन समादिष्टं मयाश्रुतं ॥ एवं गुणमहात्म्यं लोकेश्वरस्य सम्भुमा ॥ विहाय भवसंगत्वा

गुण

भवन्तु बोधिवाञ्छिनः ॥ ततः सर्वे सभासीना लोका हृष्टा कि श्रद्धया सदा ॥ सद्धर्म्मगुणसत्सौख्यं शुश्रूषया
युः श्रुत्वा बभूविरे ॥ तथागतात्मजस्यास्य सद्धर्म्मामृतमूलकं ॥ पिबन्तं बोधिमासाद्य प्राप्नुयात्स सु-
निर्वृतिं ॥ इत्यादिष्टं मुनीन्द्रेण श्रीघनेन निशम्य ते ॥ सर्वे सभाश्रिता लोकाः प्रानन्दन्तु प्रबोधिताः ॥
॥ ॥ इति श्रीगुणकारण्डव्यूहे महायानसूत्रे [illegible] प्रकरणं ॥ ३ ॥ १२
अथ भगवाञ्छाक्यसिंहो मुनीश्वरः ॥ विष्कम्भिनं समालोक्य पुनरेवं समादि-
शत् ॥ शृणु कुलपुत्रास्य लोकेश्वरस्य सन्मतेः ॥ सद्धर्म्मगुणमाहात्म्यं श्रुतं मया [illegible] ॥ तदा गगन-
गञ्जोऽसौ भगवन्तं मुनीश्वरं ॥ विश्वभुवं समानम्य पुनरेवमपृच्छत ॥ भगवन्सो महाभिज्ञो लोके-

---

श्वरो जिनात्मजः ॥ पुनः सत्त्वान्समुद्धर्तुं कुत्रान्यत्राभिगच्छति ॥ पुनस्तस्मात् भूमिकान्ति यदन्यत्र सहस्त्र-
न्तु ॥ सत्त्वान्यत्रं समुद्धृत्य धर्म्मयुक्तिं तदादिश ॥ इति तेनादितं श्रुत्वा भगवान्स मुनीश्वरः ॥ गगनगञ्जं
समालोक्य तं पुनरेवमादिशत् ॥ शृणु कुलपुत्रास्य लोकेशस्य जगत्प्रभोः ॥ वक्ष्ये सद्गुणमहात्म्यं
श्रद्धया त्वं यदीच्छसि ॥ अथासौ महासत्त्वो लोकेश्वरो जिनात्मजः ॥ ततोऽनुपमयितुमीगच्छति
प्रभासयन् ॥ ततः सत्त्वान् [illegible] विलोक्य सः ॥ लोकेश्वरः दिव्यरूपः समुपाश्रित्य तिष्ठ-
ति ॥ तद्दिव्यरूपमालोक्य सर्वे ते विस्मयान्विताः ॥ पुनः समुपागत्य एवं प्रार्थयन् सदा ॥ भगव-
न्नाथ [illegible] ॥ तदस्मान्कृपयालोक्य समुद्धर्तुमिहार्हसि ॥ इति तैः प्रार्थ्यमानः सो

गुण

लोकेश्वरः कृपयात्मकः ॥ तान् सर्व्वान् समुपासीनान् समालोक्यैवमादिशत् ॥ एवं कालेन समाधाय शृ
णुध्वं यूयमादरात् ॥ वक्ष्यामि यत्नतः सिद्धं धर्म्मनिर्वृतिसाधनं ॥ तद्यथा यत्कृतं कुशलं त्रिरत्नभजका
त्मकं ॥ तत्सत्वाः शरणं गत्वा भजध्वं सर्व्वदादरात् ॥ ये त्रिरत्नं शरणं गत्वा न ते गच्छन्ति दुर्गतिं ॥ सदा स
द्गतिसंजाता भवन्ति बोधिसम्बरं ॥ एतत्पुण्यानुभावेन सर्व्वेऽपि पूर्णपारमाः ॥ बोधिसत्वा महासत्वा
ः सर्व्वेऽपि सुगता जिनाः ॥ ततश्च बोधिसम्भारं पूरयित्वा यथाक्रमं ॥ सर्व्वसत्वहितं कृत्वा यास्यन्ति सु
खावती ॥ तत्र गत्वामिताभस्य जिनेन्द्रस्य सभाश्रिताः ॥ सद्धर्म्मामृतमाधुर्य्यं सम्प्रयुः सन्महोत्सवैः ॥
एवं तत्र चिरं भुक्त्वा सौख्यं शुभोत्सवे ॥ ततस्त्रिविधां बोधिं प्राप्य यास्यन्ति निर्वृतिं ॥ एवं मत्वात्र

२३

ये सत्वास्तोऽश्रद्धयाशयसंस्थिताः ॥ स्मृत्वा ध्यात्वा समाराध्य नामापि स्मरतादरात् ॥ तदेतत्पुण्यलिप्ताङ्गाः शु
द्धाशया जितेन्द्रियाः ॥ निःक्लेशा विमलात्मानो बोधिसत्वा भविष्यथ ॥ ततः सत्वहितार्थेन बोधिचर्य्याव्र
तायताः ॥ सर्व्वत्र भद्रतां कृत्वा गमिष्यथ सुखावतीं ॥ तत्रामिताभनाथस्य पीत्वा धर्म्मामृतं सदा ॥ स
द्धर्म्मसङ्गतास्ताहेः रमिष्यथ ससम्वराः ॥ एवं तत्र चिरं भुक्त्वा सौख्यं तत्र महोत्सवं ॥ प्रान्ते सम्बोधिमा
साद्य समाप्स्यथ सुनिर्वृतिं ॥ एवं मत्वा सदा बुद्धरत्नस्य शरणं गताः ॥ स्मृत्वा ध्यात्वा समाराध्यः नामा
पि स्मरतादरात् ॥ धर्म्मरत्नस्य माहात्म्यं ज्ञात्वापि शरणे स्थिताः ॥ स्मृत्वा ध्यात्वा समाराध्य नामापि स्मर
तादरात् ॥ एवं संघरत्नानां सत्कारैः समुपस्थिताः ॥ स्मृत्वा ध्यात्वा समाराध्यः नामापि स्मरतादरं

ः॥ एतत्पुण्यं महत्ख्यातमसंख्येयं बहूत्तमं ॥ अप्रमेयं समाख्यातं सर्व्वैरपि मुनीश्वरैः ॥ एवं
गुरु मत्वा त्रिरत्नानां भजनं समुपस्थिताः ॥ सत्वा धम्मत्वा समाचार्य्य नामापि सर्व्वदा हि वै ॥ एतत्पुण्यानु
भावनत्पुण्यं सर्व्वे विकल्मषाः ॥ निःक्लेशा निर्म्मलात्मानः संयान्त्यथ सुखावतीं ॥ तत्र गत्वा जि
नार्हत्सम्मतिं दृश्यापसंस्थिताः ॥ सदा धर्म्मामृतं पित्वा निमग्नाथ शुभात्मवेः ॥ एवं तत्र विकल्मषा [illegible]
महानन्दमयं सुखं ॥ प्राप्य संबोधिमासाद्य संयान्त्यथ सुनिर्वृतिं ॥ इति मत्वादितं श्रुत्वा सर्व्वेश्च प
सुखास्पदा ॥ तथेति प्रतिसंश्रुत्य वदन्त्येवं समाहिताः ॥ मार्षभवत्किनान्धानां सन्मार्गप्रदर्शकः
॥ अज्ञानामपि त्राणं गतस्थं गावतार्थिनां ॥ अनाथानां पिता माता नाथः शुभ्रः सुहृत्सखिः ॥ अगती

नां गतिश्चापि मित्रं वैः व्यसनापहृतः ॥ तमःप्रलष्टमार्ग्गानां महादीपो भवानपि ॥ मूर्खानाश्च प्रसन्ना
णं शास्ता सद्धर्म्मदेशकः ॥ तद्वयं सर्व्वदा सर्व्वे भवतीं शरणं स्थिताः ॥ आराध्य त्वां गुरुं धर्म्मं सर्व्वविद्या
भवद्ध्रुवं ॥ सुखिनास्म महालाभ यत्र त्वं समुपस्थिता ॥ त्रिरत्नभजनं कृत्वास्सत्वे तं गुरुं गदा ॥ न तथाभी
दृशं दुःखं भविष्यति कदाचन ॥ यादृशीदं भवत्कृपा भवन्त्वा भवतु ॥ तद्भवान्कृपयास्माकं निर्वृति
सुखसाधनं ॥ सद्धर्म्मसमुपादिश्य सदा रक्षितुमर्हति ॥ इति तैः प्रार्थितं श्रुत्वा बोधिसत्वस्सर्व्ववित् ॥
तान्सम्बोधितान्सर्व्वान्वदन्निति विलोकयन् ॥ नाहं सदात्र तिष्ठेयं कार्य्याणि हि बहूनि मे ॥ तत्त्वयात्र समाख्यातं
धर्म्मं भवन्तः सर्व्वदा ॥ श्रुत्वा समाहितास्सम्बोधिसाधनं ॥ समाधिसन्निकाय शुभवृद्धशुभं शुभा

षितं॥ तत्सर्व्वेषां महायानशुभानां प्रवरोत्तमं॥ श्रुत्वा ते पुरुषाः सर्व्वे प्राभिनन्दन्ति बोधिताः॥ ततस्ते
पुरुषाः सर्व्वे श्रुत्वा तं सुगतमादरात्॥ त्रिरत्नशरणं कृत्वा ववन्दुः गुरुं मुदा॥ अत स्वस्थानुरागवन्त सर्व्वे
ते विमलाशयाः॥ बोधिसत्वा महासत्वा भवन्ति ब्रह्मचारिणः॥ बोधिचर्य्याव्रतं धृत्वा प्रवव्रज्याङ्गच्छित
सद्धर्म्मचरणोद्युक्ता भवन्त्यप्यनिवर्त्तिनः॥ एवं ते पुरुषाः सर्व्वे परिशुद्धत्रिमण्डलाः॥ स्वपरात्महि
ताशयाः सर्व्वत्रकु महासुखं॥ एवं तद्भगवानालोक्य जगन्नाथो जिनालयः॥ सर्व्वांस्तान्पुरुषान्धर्म्मे नियो
जयति बोधयन्॥ ततोऽन्यत्र समालोक्य सत्वानुद्धर्त्तुमुत्सुकः॥ सूर्य्यादिताधिकालोकाग्निदिवाकरोऽभव
गच्छति॥ एवं कृत्वा महत्पुण्यं स्कन्धेनस्य जगद्गुरोः॥ सुप्रसन्नमनस्कायं समाख्यातं सुश्रीश्रये॥ ॐ

तिमत्वा सदा तस्य गणे सन्मुपस्थिताः॥ स्मृत्वा नामापि वाऽऽचार्य्यं श्रुत्वापि भवताऽभवं॥ यत्सुभगाः हा
स्थिता श्रद्धया समुपस्थिताः॥ स्मृत्वा ध्यात्वापि नामापि समुच्चार्य्य भवन्ति वै॥ दुर्गतिं ते न गच्छन्ति कदा
चनापि हि भवे॥ सदा सद्गतिसंजाता भवन्ति धर्म्मचारिणः॥ धर्म्मश्रीगुणसौख्यं तु भुक्त्वा यान्ति सुखा
वतीं॥ तत्र गत्वा मितारस्य भावने समुपस्थिताः॥ सदा धर्म्मामृतं पीत्वा स्वपरात्महिताश्रिताः॥ महा
नन्दसुखावासं हर्षसंनमस्कृत्य यथाक्रमं॥ ततैव सुचिरं भुक्त्वा प्रवचनकारणाधिताः॥ प्राप्य बोधिंस
